SAHITYAM

ACHARYA II YEAR

**Paper - VI**

# RASAGANGADHARAH

BLOCK - II

**Directorate of Distance Education**

Rashtriya Sanskrit Vidyapeetha

Accredited at 'A' level by NAAC

Tirupati - 517 507 (A.P.)

## CHIEF EDITOR

### Vice-Chancellor

**GENERAL EDITOR**

Dr.Ch.P.Satyanarayana

Director, DDE

**PROGRAME CO-ORDINATOR**

Dr.Ch.P.Satyanarayana

**ADDITIONAL CO-ORDINATORS**

1. Dr.R.Deepta (Academic)
2. Sri.B.chandrasekharam (Technical)

**SUBJECT CO-ORDINATOR**

Prof.G.S.R.Krishna Murthy

**COURSE WRITER**

Dr. S.L.Kumara Sharma

**DIRECTORATE OF DISTANCE EDUCATION**
**R.S.VIDYAPEETHA,**
**TIRUPATI.**

अयि प्रियान्तेवासिनः,

शुभाभिनन्दनानि,

स्वागतं भवतां राष्ट्रिय-संस्कृत-विद्यापीठान्तर्गते आराद्विद्या-निदेशक-निकेते। विद्यापीठमिदं राष्ट्रिय- मूल्याङ्कनपरिषदा(NAAC) ए + इति, विश्वविद्यालयानुदानायोगेन (UGC) पारम्परिक -शास्त्रीय -समुत्कर्ष केन्द्रमिति चोद्घोषितम् ।

निकेतोऽयं मातुः सरस्वत्याः आवासस्थानत्वेनाभिमतः यस्मिन् भवतामपि विद्यानन्दाह्लादः लभ्यते तराम् । संस्कृतवाङ्मयपाटवमभिलषतां भवताम् आधारशिला भवति भवतां श्रद्धैव। श्रद्धायाः प्रोत्साहनार्थम् अध्ययने रुचिमुत्पादयितुञ्च,इयं स्वाध्ययनसामग्री निर्मिता, याञ्च भवन्तः स्वयम् अधिगन्तुं शक्नुवन्ति।

श्रद्धावतः शिष्यस्य एकलव्यस्येव गुरूपदेशः 'आराद्' मनसि प्रविशति येन च शिष्यः सत्यकामो भवति। आचार्योऽपि श्रद्धावतः शिष्यान् आरादपि दृग्दीक्षाख्योपदेशेन समेधयति कूर्मः स्वापत्यानीव -

**स्वापत्यानि यथा कूर्मो वीक्षणेनैव पोषयेत् ।**

**दृग्दीक्षाख्योपदेशस्तु तादृशः कथितः प्रिये।। इति**

कुलार्णवागमाम्नातेन दृग्दीक्षाख्योपदेशोपायानुसारिणाचार्येण श्रद्धावान् शिष्यः सत्यकामं जाबालं गौतमः हारिद्रुमतः इव उद्धरिष्यति।

सत्यकामो जाबालः जबालां मातरमामन्त्रयामास। 'मातः ब्रह्मचर्यं गुरौ वत्स्यामि किं गोत्रोऽहमि' ति। सा चैनमुवाच। सा 'हमेतन्नवेद यद्गोत्रस्त्वमसि। गुरुसमीपे सत्यकामो जाबालोऽहमस्मि भोः इति ब्रुवीथाः' इति। एवमेव जाबालः हारिद्रुमतं गौतमं गत्वा 'भवत्सु ब्रह्मचर्यं वत्स्यामी' ति प्रार्थयामास। तेन च गोत्रे पृष्टे मात्रा यदुक्तं तदेव प्रोवाच।

गौतमस्तुष्टः सत्यकामं सत्यवादिनमुपनीय चतुश्शतं गावः यूथात् पृथक्कृत्य शिष्याय दत्त्वोवाच -'यदा एताः चतुश्शतं गावः सहस्रं भवन्ति तदा भवान् गुरुकुलं प्रतिनिवर्तस्व'।

अधुना चतुश्शतं गाः नीत्वा अरण्ये चारयतात् इति।

स एवमुक्तः सत्यकामः तृणोदकबहुलम् अरण्यं गाः प्रवेश्य बहुकालं पोषयामास। सम्यग्गावो रक्षिताः यदा सहस्रं सम्पन्ना बभूवुः तदा यूथस्थः कश्चन ऋषभः सत्यकाममाहूय 'सोम्य! वयमधुना सहस्रं सम्पन्नाः अस्मानाचार्यकुलं प्रापय' इत्यादिश्य 'ब्रह्मणश्च ते पादं

ब्रवाणी' ति स्वयमेव ब्रह्मज्ञानमुपदिशति।

एवम् अग्निः हंसः मद्गुः च सत्यकाममुपदिशन्ति इति आख्यायिका छान्दोग्योपनिषदि चतुर्थाध्याये आम्नाता वर्तते। इयमौपनिषदाख्यायिका आराद्विद्यया केन सादृश्येन सङ्गच्छत इति चेत् उच्यते -

अस्ति तावत् सत्यकामविद्याप्राप्तेः आराद्विद्या निकेततो विद्याप्राप्तेश्च महत् सादृश्यम् । तथाहि - सत्यकामः - गुरुकुलात् बहिरेव ब्रह्मविद्यामध्यगीष्ट अधिगमोऽपि मानवेतरमाध्यमेन। यतोऽहि ऋषभाग्निमद्गवादयः उपदेशकर्तारः । अन्ते गुरूपदेशः इति।

आराद्विद्याबोधनमपि विश्वविद्यालयात् दूरे बहिरेव भवति। बोधनसामग्र्यपि प्रवाचकभिन्नमेव मुद्रितपुस्तकसान्द्रमुद्रिकादीति, अन्ते किञ्चित्कालं साक्षादुपदेशः (Contact Programme) इति च।

अतस्सत्यकामवद्विद्याकामा भूत्वा कृतार्था भूयासुरिति धिया पृष्ठपत्रं जाबालोपाख्यानेन सचित्रितम् । अतोऽस्माकमवगत्यान्तरङ्गं श्रद्धया पाठ्यांशानामध्ययने रता भवन्तु।

**श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः।**
**ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति।।**

निदेशकः

# विषयसूची


क्रमसङ्ख्या विषयः पृष्ठसङ्ख्या

## VI. गुणमीमांसा (1-22)

VI. 1. गुणसामान्यस्वरूपम्- तत्तद्रसेषु गुणतारतम्य निरूपणम् ....... 2

i. गुणसामान्यस्वरूपम् ........................................................ 2

ii. तत्तद्रसेषु गुणतारतम्यनिरूपणम् ............................................ 3

VI. 2. गुणानां रसमात्रधर्मत्वदूषणम्, पण्डितराजोक्तं रसादिधर्मत्वञ्च 4

i. गुणानां रसमात्रधर्मत्वदूषणम् ............................................ 4

ii. पण्डितराजोक्तं गुणानां रसादिधर्मत्वम् .................................... 6

VI. 3. वामनोक्तगुणानां लक्षणोदाहरणे .................................... 7

i. शब्दगुणाः .......................................................................... 7

१. श्लेषः २. प्रसादः ३. समता ४. माधुर्यम्

५. सुकुमारता ६. अर्थव्यक्तिः ७ उदारता ८. ओजः

९. कान्तिः १०. समाधिः

VI. 3. ii. अर्थगुणाः .......................................................................... 14

१. श्लेषः २. प्रसादः ३. समता ४. माधुर्यम्

५. सुकुमारता ६. अर्थव्यक्तिः ७. उदारता ८. ओजः

९. कान्तिः १०. समाधिः

VI. 4. मम्मटोक्तत्रिगुणान्तर्भाववादः ............................................ 20

VI. 5. पाठ्यांशेऽस्मिन् सम्भाविताः प्रश्नाः .................................... 22

## VII. गुणाभिव्यञ्जकरचनादिमीमांसा (23-34)


VII. 1. तत्तद्गुणभिव्यञ्जकरचना .............................................. 23

i. माधुर्याभिव्यञ्जकरचना .............................................. 23

ii. ओजोऽभिव्यञ्जकरचना .............................................. 25

iii. प्रसादाभिव्यञ्जकरचना .............................................. 26

VII. 2. सामान्यतो वर्जनीयाः .............................................. 27

VII. 3. विशेषतो वर्जनीयाः .............................................. 30

VII. 4. पाठ्यांशेऽस्मिन् सम्भाविताः प्रश्नाः .............................................. 34


## VIII. भावमीमांसा (35-63)


VIII. 1. भावलक्षणविचारः .............................................. 35

i. तत्र नाद्यः .............................................. 36

ii. न द्वितीयः .............................................. 37

VIII. 2. भावाभिव्यक्तौ मतभेदाः .............................................. 38

i. स्थायिभावन्यायेनाभिव्यक्तिः .............................................. 38

ii. रसन्यायेन अभिव्यक्तिः .............................................. 38

iii. व्यङ्ग्यन्तरन्यायेन अभिव्यक्तिः .............................................. 39

VIII. 3. भावाभिव्यञ्जकसामाग्री .............................................. 39

VIII. 4. भावसंख्या .............................................. 40

VIII. 5. भावलक्षणानि कतिपयभावनां लक्षणोदाहरणे च .............................................. 42

i. भावलक्षणानि .............................................. 43

VIII. 5. ii. कतिपयभावानां सोदाहरणं लक्षणानि .............................................. 45

१. हर्षः .............................................. 45

२. स्मृतिः ३. व्रीडा .............................................. 46, 47

४. मोहः ५. ग्लानिः .............................................. 48, 49

६. दैन्यम् ७. मदः .............................................. 50, 51

८. श्रमः ९. गर्वः १०. विबोधः ......................... 51-53

११. अमर्षः १२. उग्रता १३. मरणम् ......................... 54-56

१४. विषादः १५. निर्वेदः १६. देवादिविषया रतिः ...... 56-58

VIII. 6. कतिपयभावानां पारस्परिको भेदः .................................. 58

i. शङ्काचिन्तयोः ii. चिन्तौत्सुक्ययोः .................................. 59

iii. ग्लानिश्रमयोः iv. उग्रतामर्षयोः .................................. 59-60

v. व्याध्युन्मादयोः vi. चिन्तावितर्कयोः .................................. 60

vii. मोहजडतयोः viii. ग्लानि-आलस्य-जडतानां भेदः ................ 60-61

ix. श्रमालस्ययोः भेदः x. अपस्मारव्याध्योः xi. चपलतामर्षयोः ...... 61

VIII. 7. भावानां पदप्रकाश्यत्वम् ............................................ 62

VIII. 8. भावानां रसानां च भेदः ............................................ 63

VIII. 9. पाठ्यांशेऽस्मिन् सम्भाविताः प्रश्नाः .................................. 63


## IX. रसाभासादिमीमांसा (64-72)


IX. 1. रसाभासविचारः ................................................................ 64

i. रसाभासशब्दविचारः ........................................................ 65

ii. एकेषां मतम् ................................................................ 65

iii. अपरे तु मतम् ................................................................ 65

iv. नवरसेषु विद्यमाना आभाससरणिः .................................. 66

v. शृङ्गाराभासः ................................................................ 67

(अ) राजरमण्यालम्बनस्य शृङ्गाराभासस्योदाहरणं यथा ....... 67

(आ) बहुनायकविषया रतिः यथा .................................. 68

(इ) अनुभयनिष्ठारतिः यथा ............................................ 68

(ई) विप्रलम्भाभासो यथा ............................................ 68

vi. द्रौपदीगतः अनुरागः किं रूपः ?.......................................... 69

XI. 2. भावाभासविचारः ................................................................ 70

XI. 3. पाठ्यांशेऽस्मिन् सम्भाविताः प्रश्नाः .................................. 72

## X. भावशान्त्यादिमीमांसा (73-86)

X. 1. भावशान्त्यादिविचारः .................................................... 73

i. भावशान्तिः .................................................... 73

ii. भावोदयः .................................................... 74

iii. भावसन्धिः .................................................... 75

iv. भावशबलता .................................................... 76

v. यत्तु-मतखण्डनम् .................................................... 77

X. 2. भावोदयादिध्वनिषु सर्वत्र भावध्वनित्वमेव .................................................... 78

X. 3. रत्यादीनां संलक्ष्यक्रमत्वविचारः .................................................... 81

X. 4. रसादिध्वन्यभिव्यञ्जकनिरूपणम् .................................................... 83

i. पदम् .................................................... 83

ii. & iii. वर्णाः, रचना च .................................................... 84

iv. वाक्यम् .................................................... 85

v. प्रबन्धः .................................................... 85

vi. प्रत्ययादिरूपपदैकदेशः .................................................... 85

vii. अवर्णात्मकाः रागादयः .................................................... 85

X. 5. पाठ्यांशेऽस्मिन् सम्भाविताः प्रश्नाः .................................................... 86

## XI. परिशिष्टम् (87-89)

XI. 1. प्रारम्भश्लोकव्याख्यानम् .................................................... 87

XI. 2. रसगङ्गाधरप्रस्तावनाश्लोकाः .................................................... 89

# VI. गुणमीमांसा

प्रकरणेऽस्मिन्—

1. **गुणसामान्यस्वरूपम् - तत्तद्रसेषु गुणतारतम्यनिरूपणम्**
2. **गुणानां रसमात्रधर्मत्वदूषणं - पण्डितराजोक्तं रसादिधर्मत्वम्**
3. **वामनोक्तगुणानां लक्षणोदाहरणे**
4. **त्रिगुणान्तर्भाववादः**

इत्यमी विषयाः प्राधान्येन परिशीलयितुमिष्यन्ते।

एवं पूर्वप्रकरणैः रससम्बन्धिषु बहुषु विषयेषु निगदितेषु माधुर्य-ओजः-प्रसादाख्यान् त्रीन्गुणान् केचित् आचार्याः आहुः । **जरत्तरास्तु** इति आरभ्य **श्लेषः प्रसादः समता** इत्यादिदण्डिकारिकां परामृशता पण्डितराजेन वामनाभिमताः द्विगुणीकृताः दशगुणाः निरूपिताः ।

वस्तुतः पण्डितराजस्य मते गुणाः कति ? गुणाः सन्ति न वा ? इत्युक्ते तन्मते वास्तविकदृक्पथानुसारेण गुणाः न सन्त्येव इति केचित् आचार्याः आशेरते । वस्तुतः पण्डितराजेन तत्तद्गुणाभिव्यञ्जकरचनाया अपि निरूपितत्वात्, तत्रापि त्रिगुणानामेव परामर्शात्, पण्डितराजमते गुणाः न सन्ति इति वक्तुं न शक्यते । अभिव्यञ्जकरचनाप्रस्तावेऽपि पण्डितराजेन गुणत्रयपरामर्शात्, तस्य त्रिगुणान्तंर्भववादः इष्ट एव । एवं वामनोक्तशब्दार्थगुणा पण्डितराजेन असाधारणतया सम्यक् परिष्कृताः । अतः वामनवादेऽपि तस्य प्रीतिराहित्यं वक्तुं न शक्यते ।

**स्वावलोकनप्रश्नाः**

१. **श्लेषः प्रसादस्समता** इयं कारिका कस्य भवति ?

२. जरत्तराः के ?

३. पण्डितराजमते **गुणाः न सन्ति** इति कथम् ?

४. पण्डितराजमते **गुणाः सन्ति** इति कथं वक्तुं शक्यते ?

# VI. 1. गुणसामान्यस्वरूपम्- तत्तद्रसेषु गुणतारतम्य निरूपणम्

## VI. 1. i. गुणसामान्यस्वरूपम्

एतेषां च गुणानां किं वा सामान्यस्वरूपम् इत्युक्ते— **काव्यशोभायाः कर्तारो धर्माः गुणाः** इति सूत्रयता वामनाचार्येण सामान्यतः काव्यशोभासम्पादकधर्मत्वं गुणानां लक्षणतया प्रतिपादितम् । पण्डितराजस्य मते किं वा गुणस्वरूपम् इत्युक्ते द्रुत्यादिचित्तवृत्तिप्रयोजकत्वमेव गुणसामान्यलक्षणम् । द्रुतिः-दीप्तिः-विकासः इति तिस्रः चित्तवृत्तयः। तत्र शृङ्गार-करुण-शान्तेषु द्रुतिः सहृदयेनानुभूयते । वीररौद्रादौ तु दीप्तिः। सर्वेषु च रसेषु चित्तविकासश्चानुभूयते। तादृशद्रुत्यादिचित्तवृत्तिहेतुत्वमेव । अर्थात् साक्षात् **तादृशद्रुत्यादिचित्तवृत्तिकारणत्वमेव गुणः** इति मम्मटाचार्याः मेनिरे। तादृशचित्तवृत्तिहेतुत्वं साक्षाच्चेत् रसेष्वेव अस्ति । न शब्दार्थयोः न वा रचनायाम् ।

अतः **शृङ्गारो मधुरः, ओजस्वी रौद्रः** इत्यादयः मुख्यव्यवहाराः द्रुतिदीप्त्यादिकं प्रति रचनायाम् अथवा बन्धे साक्षात् हेतुत्वस्य अभावात् **मधुरा रचना, ओजस्वी बन्धः** इत्यादयः व्यवहारास्तु अभिव्यङ्ग्यरसधर्मान् माधुर्य-ओजःप्रभृतीन् व्यञ्जकरचनायाम् आरोप्य प्रवृत्ता इति, पूर्वोक्तव्यवहाराः आत्मगतशौर्यं शरीरे आरोप्यैव औपचारिका एव न मुख्याः इत्यूचिरे ।

वस्तुतः पण्डितराजः काव्यप्रकाशकारोक्तं द्रुत्यादिहेतुत्वं द्रुप्त्यादिप्रयोजकत्वेन परिष्कृत्य, द्रुत्यादिकं प्रति साक्षात् परम्परासाधारणकारणत्वलक्षणस्य प्रयोजकत्वस्य रसे रचनायां तन्मूलकन्दयोः शब्दार्थयोश्च सत्त्वात्, परस्परविरुद्धयोः प्राचीननवीनालङ्कारिकायाः (वामन-ध्वनिकारवादयोः)साधु पण्डितराजः समन्वयमकार्षीत्।

**स्वावलोकनप्रश्नाः**

१. पण्डितराजमते गुणस्वरूपं किम् ?

२. **ओजस्वीबन्धः मधुरा रचना** इत्यादिव्यवहाराः कथं सम्पद्यन्ते ?

३. पण्डितराजेन प्राचीनानां मतानि कथं समन्वयीकृतानि ?

## VI. 1. ii. तत्तद्रसेषु गुणतारतम्यनिरूपणम्

तत्र शृङ्गार-करुण-विप्रलम्भ-शान्तेषु माधुर्यं प्रकर्षेण वर्तते । वीर-बीभत्स-रौद्रेषु ओजसः प्रकर्षः अतिशयितः । उत्तरोत्तरम् अतिशयितायाः चित्तदीप्तेर्जननात् । अद्भुत-हास्य-भयानकेषु तु केचित् प्रसादौजसी, केचिच्च प्रसादमात्रम् अभ्युपगच्छन्तीति सामान्यतो निर्णयः । शृङ्गारादिषु माधुर्यसद्भावविषये तु मतभेदाः सन्ति ।

**(अ)** तत्र संयोगशृङ्गारापेक्षया अतिशयितं माधुर्यं करुणे, ताभ्यामपि विप्रलम्भे तेभ्योऽपि शान्ते माधुर्यमतिशयितम्, उत्तरोत्तरमतिशयितायाः चित्तवत्तेः जननात्, **—इति केचित् ।**

**(आ) अपरे तु—** संयोगशृङ्गारात् करुण-शान्तयोः, ताभ्यामपि विप्रलम्भे माधुर्यमतिशयितम् इति न्यगदन् ।

**(इ) अन्ये तु—** संयोगशृङ्गारात् करुणविप्रलम्भशान्तेषु अतिशयितमेव माधुर्यम्, न पुनस्तत्रापि तारतम्यम् इति मतत्रयम्।

पूर्वोक्तमतत्रये **करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम्** इति काव्यप्रकाशसूत्रवचने **तस्याधिक्यं क्रमेण तु** इति अनन्तरकारिकाभागघटकस्य **क्रमेण** इति पदस्य अपकर्षे संयोग-करुण-विप्रलम्भ-शान्तेषु उत्तरोत्तरमतिशयितं माधुर्यम् इति मतं पर्यवस्यति। यदि क्रमपदस्य अपकर्षः न क्रियेत, तर्हि एषु चतुर्ष्वपि सममेव अतिशयितं माधुर्यमिति पर्यवस्यति। मध्यस्थमते तु विप्रलम्भे अत्यधिकं माधुर्यम् अस्ति इत्यत्र सहृदयानुभवरूपः। साक्षी एव प्रमाणम् । प्रसादस्तु सर्वेषु रसेषु, सर्वासु रचनासु च साधारणः । अस्मात् विकासाख्यः चित्तवृत्तिविशेषः जायते ।

**स्वावलोकनप्रश्नाः**

१. तत्तद्रसेषु गुणतारतम्यं कथम् ?

२. प्रथमं मतं किम् ? प्रथममते निष्कर्षः कः ?

३. द्वितीयं मतं किम् ? द्वितीयमते निष्कर्षः कः ?

४. तृतीयं मतं किम् ? तृतीयमते निष्कर्षः कः ?

इदानीमेतेषां गुणानां किं धर्मत्वमिति जानीमः ।

# VI. 2. गुणानां रसमात्रधर्मत्वदूषणम्, पण्डितराजोक्तं रसादिधर्मत्वञ्च

## VI. 2. i. गुणानां रसमात्रधर्मत्वदूषणम्

**काव्यशोभाधायकाः शब्दार्थधर्माः गुणाः** इति वामनः। **रसधर्माः रसोपस्कारकाः गुणाः** इति ध्वनिकारप्रभृतयः । **रसमात्रधर्माः गुणाः** इति मम्मटाचार्यः । पण्डितराजस्तु— **गुणाः न केवलं रसमात्रधर्माः** इति सिद्धान्तीचकार । **द्रुत्यादिचित्तवृत्तिप्रयोजकत्वं च** पण्डितराजमते गुणसामान्यलक्षणम् ।

तच्च गुणसामान्यरूपं अर्थात् द्रुत्यादिचित्तवृत्तिप्रयोजकता न केवलं रसे अस्ति, अपि तु गन्धः पत्रकुट्मलकुसुमादिविविधावस्थासु पृथिव्यामिव शब्दार्थरचना रसेषु अस्तीति रसमात्रधर्मत्वं खण्डितवान्, न रसधर्मत्वम् । रसधर्मत्वखण्डनं तु रसमात्रधर्मत्वखण्डनस्य अङ्गभूतम् । तच्च इत्थं कृतम् । येऽमी माधुर्योजःप्रसादादयः रसमात्रधर्मतया उक्ताः तेषां रसमात्रधर्मत्वे किं मानम् ? किं प्रत्यक्षम् ? उत अनुमानम्? आहोस्वित् शास्त्रकाराणां वचः ?

**नाद्यः ।** वह्नौ विद्यमानयोः दाहकत्व-उष्णस्पर्शयोरिव रसे द्रुत्यादिभ्यः माधुर्यादिगुणानां पृथगननुभवात्। एकाश्रितयोश्च द्वयोः धर्मयोः पृथगनुभावः प्रत्यक्षप्रमाणसिद्धः ।

**न द्वितीयः ।** गुणानां रसधर्मत्वम् अनुमानेन साधनीयं चेत् इत्थं सम्भवनीयम् । **द्रुत्यादिचित्तवृत्तिकारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वात् घटनिरूपितदण्डनिष्ठकारणतावत्** इत्यनुमानेन । तत्र च द्रुत्यादिकारणं यदि गुणविशिष्टो रसः, तर्हि कारणतावच्छेदकतया गुणस्य सिद्धेः सिद्धं गुणानां रसधर्मत्वम् । किन्तु तत्तद्गुणविशिष्टरसत्वेन कारणताकल्पने गौरवात्, रसानां शृङ्गार-करुण-शान्तादिगतप्रातिस्विकधर्मरूपेणैव कारणताकल्पनम् । न च पूर्वोक्तरसत्रयेऽपि माधुर्यस्य अविशिष्टत्वात् द्रुतिं प्रति रसस्य माधुर्यवत्त्वेन कारणत्वे लाघवमिति वाच्यम् । द्रुतावपि तरतमभावस्य केनचित् अङ्गीक्रियमाणत्वेन, प्रातिस्विकधर्मपुरस्कारेणैव तत्तद्रसानां कारणतायाः कल्पनीयत्वात् । एवञ्च गुणानामनुमानेन रसधर्मत्वं न सिद्ध्यति ।

**न तृतीयः ।** अद्वैतवेदान्तिमते आत्मनः निर्गुणत्वेन तदनुसार्यालङ्कारिकमतेऽपि गुणानां काव्यात्मभूतस्य धर्मत्वस्य अयोगात्। किञ्च तार्किकमतेऽपि गुणे गुणान्तरानङ्गीकारात् सुखादिचित्त-वृत्त्यात्मकशृङ्गारादिधर्मत्वं माधुर्यादेः गुणस्य नोपपद्यते।

एवं गुणानां रसधर्मत्वे युक्तेः अदर्शनात्, गुणानां रसमात्रधर्मत्वं न सिद्ध्यतीति पण्डितराजस्य परमसिद्धान्तः ।

**स्वावलोकनप्रश्नाः**

१. वामनमतानुसारं गुणाः किं निष्ठाः ?

२. आनन्दवर्धनानुसारं गुणाः किं निष्ठाः ?

३. पण्डितराजमतानुसारं गुणाः कस्य धर्माः ?

४. गुणाः प्रत्यक्षविषयाः कुतो न भवन्ति ?

५. गुणाः अनुमानविषयाः कुतो न भवन्ति ?

६. गुणाः रसधर्माः कुतो न भवन्ति ?

## VI. 2. ii. पण्डितराजोक्तं गुणानां रसादिधर्मत्वम्

अथ गुणानां रसधर्मत्वे निराकृते **शृङ्गारो मधुरः** इत्यादिव्यवहारः कथं सङ्गच्छत इति चेत्— अत्रोच्यते । औपचारिक एवायं पूर्वोक्तो व्यवहारः । तथा हि— माधुर्यं नाम द्रुत्याख्यचित्तवृत्ति-प्रयोजकत्वम् अथवा प्रयोजकतासम्बन्धेन द्रुतिमत्वम् । एवञ्च द्रुत्याश्रयत्वलक्षणमाधुर्यस्य सहृदयचित्तधर्मस्य अभावेऽपि, द्रुतिप्रयोजकत्वलक्षणमाधुर्यस्य तत्र सत्त्वात् औष्ण्यरहितायामपि औष्ण्यहेतौ वाजगन्धायां यथा **वाजगन्धा उष्णा** इति व्यवहारः, एवं द्रुतिहीनेऽपि शृङ्गारे द्रुतिहेतुत्वस्य अथवा द्रुतिं प्रति परम्परया कारणत्वलक्षणस्य प्रयोजकत्वस्य सत्त्वात् **शृङ्गारो मधुरः** इत्यादिव्यवहारः औपचारिकः ।

वस्तुतस्तु पण्डितराजमते पूर्वोक्तः व्यवहारः मुख्य एव । तथा हि— **द्रुप्त्यादिचित्तवृत्ति-प्रयोजकत्वम्** इत्यत्र प्रयोजकत्वम् अदृष्टविलक्षणं शब्दार्थरसरचनागतं विलक्षणं कारणत्वं ग्राह्यम् । अतः द्रुत्यादिचित्तवृत्तिप्रयोजकत्वस्य अदृष्टे सत्त्वात् तत्र अतिव्याप्तिरिति न शङ्कनीयम् । यद्यपि गुणानां रसधर्मत्ववादे पण्डितराजेन दूषिते, पुनः गुणानम् स्वोक्तं रसमात्रधर्मत्वं पूर्वपरग्रन्थ-विरुद्धमिव आभाति । किन्तु द्रुत्यादिरूपस्य सहृदयगुणस्य स्वकारणीभूतं रसम्, तदभिव्यञ्जिकां रचनाम्, तदुपादानभूतौ शब्दार्थौ वा विना असम्भवात् द्रुत्यादिचित्तवृत्तिप्रयोजकत्वमेव काव्यगुणः । स च शब्द-अर्थ-रचना-रसेषु अस्तीति, गुणानां द्रुत्यादिचित्तवृत्तिप्रयोजकत्वलक्षणानां रसधर्मत्वमपि, पण्डितराजस्य मुख्यतयैवेष्टमिति **शृङ्गारो मधुरः** इत्यादौ लाक्षणिकत्वं न कल्पनीयम् ।

एवम् **ओजस्वी बन्धः, मधुरा रचना** इत्यादावपि द्रुत्यादिचित्तवृत्तिप्रयोजकत्वमस्त्येवेति उपचारः पण्डितराजमते न कल्प्यः । तर्हि गुणानां रसधर्मत्वस्यापीष्टत्वे रसधर्मतावादः किमर्थं निराकृतः इत्युक्ते-काव्यप्रकाशकृता गुणानां रसमात्रधर्मत्वप्रत्यायने **शौर्यादय इवात्मनः** इति दृष्टान्तमात्रं प्रतिपादितम् । न हि युक्तिं विघ्नना दृष्टान्तमात्रेणार्थसिद्धिः । अत एव रसधर्मत्वं मम्मटोक्तं प्रथमतः पण्डितराजेन दूषितम् । किन्तु द्रुत्यादिप्रयोजकत्वस्य गुणत्वे तत् शब्दार्थरचनास्विव तन्निष्पीडिते रसेऽप्यस्तीति युक्तं गुणानां शब्दार्थरचनाधर्मत्वमिव रसधर्मत्वमिति शम् ।

**स्वावलोकनप्रश्नाः**

१. गुणानां रसधर्मत्वे निराकृते **शृङ्गारो मधुरः** इति प्रयोगः कथम् ?

२. **वाजिगन्धा उष्णा** इति दृष्टान्तः कथं गुणानां रसधर्मत्वनिरूपणे सम्भवति ?

३. **शृङ्गारो मधुरः** इत्यत्र कथं लाक्षणिकत्वे न सम्भवति ?

साम्प्रतं वामनोक्तान् विंशतिगुणान् जानीमः ।

## VI. 3. वामनोक्तगुणानां लक्षणोदाहरणे

**श्लेषः प्रसादः समता माधुर्यम् सुकुमारता ।**
**अर्थव्यक्तिः उदारता ओजः कान्तिः समाधयः ।।**

इति कारिकायां विद्यमानाः दशगुणाः वामनेन निरूपिताः । ते च शब्दगतत्वेन अर्थगतत्वेन च द्विधा विभक्ताः । अर्थात्– वामनेन विशतिगुणाः अङ्गीकृताः । यद्यपि गुणाः नाम्ना दश, तथापि आश्रयभेदेन द्वैविध्यात् विंशतिः । तेषां पृथक् लक्षणानि निरूपितानि । निरूपितानां च लक्षणानि वामनाभिप्रायपर्यालोचन-पुरस्सरं पण्डितराजेन निरूपितानि ।

**स्वावलोकनप्रश्नाः**

१. वामनोक्ताः दशगुणाः के ?

२. दश गुणाः कथं विंशतिधा भवन्ति ?

## VI. 3. i. शब्दगुणाः

### १. श्लेषः

**मसृणत्वं श्लेषः** इति वामनोक्तं लक्षणम् । तच्च मसृणत्वं गाढत्वरूपम् । तच्च गाढत्वं किमात्मकम् इत्युक्ते– **भिन्नानामपि शब्दानां एकत्वप्रतिभानप्रयोजकः संहितयैकजातीयवर्ण-विन्यासविशेषः** इति पण्डितराजस्य अभिप्रायः । तादृशगाढत्वमेव श्लेषः । यथा–

**अनवरतविद्वद्द्रुमद्रोहिदारिद्र्यमाद्यद्द्विपोद्दामदर्पौघविद्रावणप्रौढपञ्चाननः ।**

अत्र सत्स्वपि बहुषु पदेषु एकपदभावना भवति । **विद्वद्द्रुमद्रोहि...** इत्यादौ अव्यवधानेन एकजातीयवर्णविन्यासविशेषः गाढत्वं श्लेषः । दकारात्मकः एकजातीयो वर्णः श्रूयते । तेन गाढता-मसृणता सम्पादिता । अतोऽयं श्लेषः ।

**स्वावलोकनप्रश्नाः**

१. श्लेषनामकस्य गुणस्य प्राचीनं लक्षणं किम् ?

२. श्लेषगुणस्य परिष्कृतं लक्षणं किम् ?

**२. प्रसादः**

**आरोह-अवरोहाभ्यां गाढत्वशैथिल्याभ्यां व्युत्क्रमेण मिश्रणं बन्धस्य प्रसादः** इति पण्डितराजोक्तं प्रसादलक्षणम् । **शैथिल्यं प्रसादः** इति कथयतापि वामनेन शुद्धशैथिल्यस्य दोषत्वेन प्रतिपादनात्, गाढत्वमेलनं तत्र प्रतिपादितम् । गाढत्वशैथिल्ययोश्च क्रमेण सम्मेलने प्रसादो वा व्युत्क्रमेण मेलने प्रसादो वा इति सन्देहे क्रमे सति समाधेरेव वामनेन उपवर्णनात् गाढत्वशैथिल्ययोः व्युत्क्रमेण मेलन एव प्रसादः ।

**किं ब्रूमस्तव वीरतां वयममी यस्मिन् धराखण्डल**
**क्रीडाकुण्डलितभ्रु शोणनयने दोर्मण्डलं पश्यति ।**
**माणिक्यावलिकान्तिदन्तुरतरैः भूषासहस्रोत्करै-**
**र्विन्ध्यारण्यगुहागृहावनिरुहाः तत्कालमुल्लासिताः ।। पृ. ७० ।।**

इत्यादौ पद्ये **वयममी** इत्यन्तं शैथिल्यस्य **कुण्डलितभ्रु** इत्यन्तं गाढत्वस्य, ततः शैथिल्यस्य, ततः उत्तरार्धे **मणिक्यावलि** इत्यादौ गाढत्वस्य च निर्वाहात् इदं प्रसादस्य उदाहरणम्।

**स्वावलोकनप्रश्नाः**

१. प्रसादस्य प्राचीनं लक्षणं किम् ?

२. गाढत्वशिथिलत्वयोः क्रमेण निर्वहणे को गुणः ?

३. प्रसादस्य जगन्नाथोक्तं लक्षणं किम् ?

४. प्रसादस्य उदाहरणे कुत्र गाढता ? कुत्र शिथिलता ?

**३. समता**

**उपक्रमादासमाप्तेः रीत्यभेदः समता** इति समतायाः लक्षणं पण्डितराजेन प्रतिपादितम् । **मार्गाभेदः समता** इति वामनोक्तलक्षणे मार्गपदस्य पण्डितराजेन रीतिपदेन व्याख्यानं प्रवर्तितम् । यथा—

**नितरां परुषा सरोजमाला न मृणालानि विचारपेशलानि ।**
**यदि कोमलता तवाङ्गकानामथ का नाम कथापि पल्लवानाम् ।।**

अत्र सर्वस्यापि पद्यस्य उपनागरिकया रीत्या निर्वहणात् समतालक्षणसमन्वयः ।

**स्वावलोकनप्रश्नाः**

१. **मार्गाभेदः समता** इति प्राचीनलक्षणे मार्गशब्दस्य कः अर्थः ?

२. पण्डितराजस्य समतालक्षणं किम् ?

३. समतायाः उदाहरणे का रीतिः ?

### ४. माधुर्यम्

**संयोगपरह्रस्वातिरिक्तवर्णघटितत्वे सति पृथक् पदत्वं माधुर्यम्** इति पण्डितराजपरिष्कृत-माधुर्यस्य लक्षणम् । **पृथक्पदत्वं माधुर्यम्** इति माधुर्यस्य लक्षणम् । वामनोक्तमाधुर्यस्य स्वरूपप्रकाशनाय पण्डितराजेन संयोगपरह्रस्वातिरिक्तवर्णघटित्वे सति इति दलं निवेशितम् । यथा—

**'नितरां पुरुषा सरोजमाला——'** इत्यादि।

**स्वावलोकनप्रश्नाः**

१. पण्डितराजस्य माधुर्यलक्षणं किम् ?

२. वामनोक्तं माधुर्यलक्षणं किम् ?

३. पण्डितराजस्य माधुर्यगुणस्य उदाहरणं किम् ?

### ५. सुकुमारता

**अपरुषवर्णघटितत्वं सुकुमारता** इति पण्डितराजोक्तं सुकुमारतालक्षणम् । **अजरठत्वं सौकुमार्यम्** इति वामनोक्तलक्षणेनाभिन्नम् । यथा—

**स्वेदाम्बुसान्द्रकणशालिकपोलपालि-**
**दोलायितश्रवणकुण्डलवन्दनीया ।**
**आनन्दमङ्कुरयति स्मरणेन कापि**
**रम्या दशा मनसि मे मदिरेक्षणायाः ।।**

अत्र बन्धस्य अपरुषवर्णघटितत्वात् सुकुमारता समुल्लसति ।

**स्वावलोकनप्रश्नाः**

१. वामनोक्तसुकुमारलक्षणं जगन्नाथेन कथं परिष्कृतम् ?

२. जगन्नाथस्य सुकुमारतायाः उदाहरणं किम् ? कथमत्र सुकुमारता ?

**६. अर्थव्यक्तिः**

**झटिति प्रतीयमानार्थान्वयकत्वम् अर्थव्यक्तिः** । एतच्च वामनोक्तार्थव्यक्तिलक्षणेन अभिन्नम्। यथा— **'नितरां पुरुषा—'** अत्र अर्थान्वयस्य शीघ्रं स्फूर्तेः अर्थव्यक्तिः ।

**स्वावलोकनप्रश्नाः**

१. **नितरां परुषा** इत्यत्र के के गुणाः भवन्ति ?

**७ उदारता**

**कठिनवर्णघटनारूपविकटत्वलक्षणोदारता** इति पण्डितराजेन उदारतालक्षणमुक्तम् । **विकटत्वमुदारता** इति वामनोक्तलक्षणे विकटत्वं कठिनवर्णघटनारूपत्वेन परिष्कृतम्।

**प्रमोदभरतुन्दिलप्रमथदत्ततालावली-**
**विनोदिनि विनायके डमरुडिण्डिमध्वानिनि ।**
**ललाटतटविस्फुटन्नवकृपीटयोनिच्छटो**
**हठोद्धतजटोद्भटो गतपटो नटो नृत्यति ।।**

अत्र पदानां परुषवर्णसमूहात्मकत्वेन महाप्राणवर्णरूपत्वेन च वर्णनात् उदारता । केचित् वामनाभिमतं विकटत्वम् **पदानां नृत्यत्प्रायत्वम्** इत्याहुः । तन्मते वामनोक्तदिशा उदारतायाः अन्तर्भावः काव्यप्रकाशकारकृतः असङ्गतः स्यात् । अतः कठिनवर्णघटनात्मकत्वेन उदारतायाः स्वरूपमिति पण्डितराजस्य निश्चयः ।

**स्वावलोकनप्रश्नाः**

१. पण्डितराजोक्त-उदारतायाः लक्षणं किम् ? उदाहरणं किम् ?

२. विकटत्वं नाम वामनमते किम् ? पण्डितराजमते किम् ?

### ८. ओजः

**संयोगपरह्रस्वप्राचुर्यरूपं गाढत्वम् ओजः** इति पण्डितराजोक्तं ओजोलक्षणम् । एतच्च **गाढबन्धत्वमोजः** इति वामनोक्तलक्षणमेव । किन्तु गाढत्वं किमात्मकत्वमित्युक्ते वामनोक्तोदाहरण-दर्शनपुरस्सरं पण्डितराजेन संयोगपरह्रस्वप्राचुर्यरूपगाढत्वमिति परिष्कृतम् । यथा—

**साहङ्कारसुरासुरावलिकराकृष्टभ्रमन्मन्दर-**
**क्षुभ्यत्क्षीरधिवल्गुवीचिवलयश्रीगर्वसर्वङ्कषाः ।**
**तृष्णाताम्यदमन्दतापसकुलैः सानन्दमालोकिताः**
**भूमीभूषण भूषयन्ति भुवनाभोगां भवत्कीर्तयः ।।**

इत्यादौ संयोगपरह्रस्वप्राचुर्यरूपगाढत्वस्य सद्भावात् ओजोलक्षणसमत्वयः ।

**स्वावलोकनप्रश्नाः**

१. पण्डितराजोक्तस्य शब्दगतस्य ओजोगुणस्य लक्षणं किम् ?

२. पण्डितराजोक्तलक्षणस्य मूलं स्रोतः किम् ?

३. ओजो गुणस्य उदाहरणं किम् ?

**९. कान्तिः**

**अविदग्धवैदिकादिप्रयोगयोग्यानां पादानां परिहारेण प्रयुज्यमानेषु पदेषु लोकोत्तर-शोभारूपम् औज्ज्वल्यं कान्तिः** इति पण्डितराजेन वामनोक्तं लक्षणं परिष्कृतम् । यथा नितरां पुरुषा । अत्र अविदग्धैः वैदिकैः प्रयोगयोग्यानि पदानि नोपात्तानि । अतः इदं कान्तेः उदाहरणम् ।

**स्वावलोकनप्रश्नाः**

१. पण्डितराजपरिष्कृतं कान्तिगुणलक्षणं किम् ?

२. कान्तेः उदाहरणं किम् ?

३. अविदग्धाः नाम के ?

**१०. समाधिः**

**बन्धगाढत्वशिथिलत्वयोः क्रमेणावस्थापनं समाधिः** इति पण्डितराजेन समाधिलक्षणं प्रोक्तम् । आरोहावरोहक्रमः समाधिः इति वामनोक्तसमाधिलक्षणगतारोहावरोहपदयोः गाढत्व-शिथिलतारूपेण पण्डितराजकृतं व्याख्यानं तदीयव्याख्यानकौशलस्य निदर्शनम् । यथा—

**स्वर्गनिर्गतनिरर्गलगङ्गातुङ्गभङ्गतरङ्गसखानाम् ।**
**केवलामृतमुचां वचनानां यस्य लास्यगृहमास्यसरोजम् ।।**

अत्र प्रथमपादे गाढत्वस्य, द्वितीयपदे शैथिल्यस्य च दर्शनात् समाधिलक्षणसमन्वयः ।

**स्वावलोकनप्रश्नाः**

१. समाधिः नाम कः ?

२. वामनोक्तं समाधिलक्षणं किम् ?

३. आरोहावरोहौ नाम किम् ?

४. उदाहरणं किम् ?

इदानीमर्थगुणा निरूप्यन्ते ।

## VI. 3. ii. अर्थगुणाः

### १. श्लेषः

**क्रियापरम्परया विदग्धचेष्टितस्य तदस्फुटत्वस्य तदुपपादकयुक्तेश्च सामानाधिकरण्यरूपः संसर्गः श्लेषः** इति पण्डितराजोक्तं श्लेषलक्षणम् । **घटना श्लेषः** इति वामनोक्तश्लेषस्य अर्थगुणस्य लक्षणम्, पण्डितराजेन तथा स्पष्टतया प्रतिपादितम्, यथा– एतावत्पर्यन्तम् केनापि आलङ्कारिकेण नोद्घाटितम् । **क्रम-कौटिल्य-अनुल्बणत्व-उपपत्तियोगो घटना** इति वामनलक्षित-घटनालक्षणे क्रमपदस्य क्रियापरम्परा इत्यर्थः स्वीकृतः । कौटिल्यपदस्य विदग्धचेष्टितमित्यर्थः स्वीकृतः । अनुल्बणत्वपदस्य अस्पुटत्वम् इत्यर्थः उपवर्णितः । उपपत्तियोगपदस्य च उपपादकयुक्तिरित्यर्थश्च पण्डितराजेन प्रकाशितः । यथा–

**दृष्ट्वैकासनसङ्गते प्रियतमे पश्चादुपेत्यादरात्**
**एकस्या नयने निमील्य विहितक्रीडानुबन्धच्छलः ।**
**ईषद्वक्रितकन्धरस्सपुलकः प्रेमोल्लसन्मानसाम्**
**अन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति ।।**

इत्यमरुकपद्ये प्रियतमावीक्षण-नयनपिधान-अपरामुखचुम्बनप्रभृतिक्रियापरम्परायाः, अन्यासंविज्ञानपूर्वकं क्रियमाणत्वेन कौटिल्यस्य, अन्तर्हासलसत्कपोलफलकाम् इत्यत्र अस्फुटत्वस्य तदुपपादकयुक्तेश्च वर्णनात् श्लेषलक्षणसमन्वयः ।

**स्वावलोकनप्रश्नाः**

१. **क्रम-कौटिल्य-अनुल्बणत्व-उपपत्तियोगो घटना** इति वामनोक्तलक्षणे क्रमादिपदानामर्थाः जगन्नाथेन कथं व्याख्याताः ?

२. **दृष्ट्वैकासनसङ्गते** इत्यादिपद्ये श्लेषलक्षणं कथं समन्वितम् ?

**२. प्रसादः**

**यावदर्थपदत्वरूपमर्थवैमल्यं प्रसादः । कमलानुकारिवदनं किल तस्याः** — इत्युदाहरणे वदने कमलसादृश्यस्य प्रतिपादनेन सौरभाद्यर्थस्य अन्यूनातिरिक्ततया प्रतीतेः प्रसादलक्षणसमन्वयः । **कमलकान्त्यनुकारि वक्त्रम्** इत्युदाहरणे तु कान्तिपदादभावेऽपि कान्तिरूपार्थस्य स्फुरणात् व्यर्थपदघटित्वात् प्रसादो न भवति ।

**स्वावलोकनप्रश्नाः**

१. प्रसादस्य अर्थगतस्य लक्षणं किम् ?

२. **उदाहरणे सौरभम्** इति कथमागतः ?

३. **कमलकान्त्यनुकारि वक्त्रम्** इत्यत्र प्रसादः कुतः न भवति ?

**३. समता**

**प्रक्रमाभङ्गेनार्थघटनात्मकं अवैषम्यं समता** यत्र प्रथममुपक्रान्त एव अर्थः अन्तपर्यन्तं निरूह्यते सा समता । यथा—

**हरिः पिता हरिर्माता हरिर्भ्राता हरिः सुहृत् ।**
**हरिं सर्वत्र पश्यामि हरेरन्यन्न भाति मे ।। पृ. ७४ ।।**

इत्यत्र **हरिः पिता** इत्याद्युक्त्वा विष्णुर्भ्राता इत्यादेः अकथनात् **हरिर्भ्राता** इत्यस्यैव कथनात् उपक्रान्तस्यैवार्थस्य निर्वाहात् समतालक्षणसमन्वयः ।

**स्वावलोकनप्रश्नाः**

१. समता लक्षणं किम् ?

२. **हरिः पिता विष्णुर्भ्राता** इति कथने समतागुणः कुतो न भवति ?

**४. माधुर्यम्**

**एकस्या एव उक्तेः भङ्ग्यन्तरेण पुनः पुनः कथनात्मकम् उक्तिवैचित्र्यं माधुर्यम्।** यथा—

**विधत्तां निश्शङ्कं निरवधि समाधिं विधिरहो**
**सुखं शेषे शेतां हरिरविरतं नृत्यतु हरः ।**
**कृतं प्रायश्चित्तैरलमथ तपोदानयजनैः**
**सवित्री कामानां यदि जगति जागर्ति भवती ।।**

इत्यत्र विध्यादिभिः नास्ति किमपि प्रयोजनमिति एकस्यैव अर्थस्य उक्तिभेदेन प्रतिपादनात् माधुर्यलक्षणसमन्वयः ।

**स्वावलोकनप्रश्नाः**

१. माधुर्यस्य लक्षणम् उदाहरणं च किम् ?

२. उदाहरणे कथं समन्वयः ?

### ५. सुकुमारता

अकाण्डे शोकदायित्वाभावरूपमपारुष्यं सुकुमारता । यथा— **त्वरया यति पान्योऽयं प्रियाविरहकातरः ।** इत्यनेन प्रियाविषये तदीयं भयं पारुष्यं विना आविष्कृतम् । अतः सुकुमारता । **प्रियामरणकातरः** इत्यत्र तु मरणशब्दस्य अकाण्डे शोकदायित्वात् नास्ति सुकुमारता ।

**स्वावलोकनप्रश्नाः**

१. सुकुमारतालक्षणम् उदाहरणं च किम् ?

२. **प्रियामरणकातरः** इत्यत्र कथं न सुकुमारता ?

### ६. अर्थव्यक्तिः

**वस्तुनो वर्णनीयस्य असाधारणक्रियारूपयोः वर्णनम् अर्थव्यक्तिः ।** यथा–

**गुरुमध्ये कमलाक्षी कमलाक्षेण प्रहर्तुकामं माम् ।**
**रदयन्त्रितरसनाग्रं तरलितनयनं निवारयाञ्चक्रे ।।**

अत्र **रदयन्त्रितरसनाग्रम्** इत्यादिना नायिकागतसरसक्रियारूपाभ्यां क्रोधस्याभिव्यक्तेः अर्थव्यक्तिः ।

**स्वावलोकनप्रश्नाः**

१. अर्थव्यक्तेः लक्षणम् उदाहरणं च किम् ?

२. **रदयन्त्रितरसनाग्रम्** इति पदेन कस्य अभिव्यक्तिः भवति ?

**७. उदारता**

**ग्राम्यार्थपरिहारः उदारता** । यथा– **चुम्बनं देहि मे भार्ये कामचण्डालतृप्तये ।** इत्यादौ तु अर्थे ग्राम्यत्वस्यैव सत्त्वात् नास्त्युदारता । **गुरुमध्ये कमलाक्षी** इत्यादौ तु उदारता ।

**स्वावलोकनप्रश्नाः**

१. उदारतालक्षणोदाहरणे लिखत ?

२. **चुम्बनं देहि मे भार्ये** इत्यादौ कथं नोदारता ?

**८. ओजः**

**अर्थस्य प्रौढिरोजः** इति वामनोक्तम् ओजसो लक्षणम् । सा च प्रौढिः पञ्चविधा ।

१. एकस्य पदार्थस्य बहुभिः पदैः अभिधानम् ।
२. बहूनाञ्च एकेन ।
३. तथैकस्य वाक्यार्थस्य बहुभिः वाक्यैः ।
४. बहुवाक्यार्थस्य एकवाक्यार्थेनाभिधानम् ।
५. विशेषणानां साभिप्रायत्वं चेति पञ्चविधमोजः ।

उदाहरणानि तु रसगङ्गाधरात् ग्राह्याणि ।

**स्वावलोकनप्रश्नाः**

१. ओजसः पञ्चप्रकाराः के ?

२. पञ्चप्रकाराणामुदाहरणानि कानि ?

**९. कान्तिः**

**दीप्तरसत्वं कान्तिः** इति कान्तेः लक्षणं पण्डितराजेन, वामनोक्तमेव च प्रतिपादितम् । **दृष्ट्वैकसानसङ्गते ———** इत्यादौ नायकगतनायिकालम्बनस्य संयोगशृङ्गारस्य वर्णनात् कान्तिलक्षण समन्वयः ।

| **स्वावलोकनप्रश्नः** |
|---|
| १. **दृष्ट्वैकासनसङ्गते** इत्यादौ दीप्तरसत्वं कथम् ? |

**१०. समाधिः**

**अवर्णितपूर्णोऽयमर्थः पूर्ववर्णिताच्छायो वेति कवेरालोचनं समाधिः ।** अत्र च विषयतासम्बन्धेन कवेरालोचनस्य अर्थे सत्त्वात् समाधेरर्थगुणत्वम् । **तनयमैनाकगवेषणलम्बीकृत-जलधिजठरप्रविष्टहिमगिरिभुजायमानायाः भगवत्याः भगीरथ्याः सखी** इत्यत्र हिमगिरि-भुजत्वोत्प्रेक्षायाः अपूर्वायाः कवेरालोचने प्रसारात् समाधिलक्षणसमन्वयः ।

| **स्वावलोकनप्रश्नः** |
|---|
| १. समाधेः द्वौ विधौ कौ ? |
| २. कवेरालोचनस्य अर्थे सत्त्वं केन सम्बन्धेन ? |
| ३. अस्य उदाहरणं किम् ? |

अथ त्रिगुणान्तर्भाववादं निरूपयामः ।

## VI. 4. मम्मटोक्तत्रिगुणान्तर्भाववादः

**श्लेषप्रसादादिदशगुणानां माधुर्यौजः प्रसादात्मकेषु त्रिषु गुणष्वेव अन्तर्भावः** इति मम्मटप्रभृतीनां नवीनालङ्कारिकाणां विनिश्चयः । तत्र त्रिगुणान्तर्भावसमर्थनाय केषुचित् दोषत्वम्, कस्यचिदलङ्कारत्वम्, केषाञ्चिच्च गुणानां दोषभावरूपत्वञ्च अभ्युपगम्य त्रिगुणान्तर्भाववादः समर्थितः । नवीनालङ्कारिकेषु संक्षिप्ता दृष्टिः, प्राचीनेषु च विस्तृता दृष्टिश्च दृश्यते ।

**तत्र शब्दगुणेषु—** श्लेष-उदारता-प्रसाद-समाधीनां क्रमेण गाढत्व-विकटत्व-शैथिल्य-गाढत्वप्रधानानां गुणानाम् ओजोऽभिव्यञ्जकघटनायामन्तर्भावः । प्रसादसमाध्योस्तु अंशतः शिथिल-बन्धात्मकत्वेन, अंशतः गाढबन्धात्मकत्वेन च शिथिलबन्धात्मकस्य भागस्य माधुर्याभिव्यञ्जक-रचनायाम्, गाढबन्धात्मकस्य ओजसि च अन्तर्भावः । वामनोक्तं माधुर्यं तु मम्मटाद्यभिप्रेतमाधुर्याभि-व्यञ्जकरचनायामन्तर्भवति । समता तु सर्वत्र अनुचितैवेति क्वचित् दोष एव पर्यवस्यति । यथा—

**निर्माणे यदि मार्मिकोऽसि नितरामत्यन्तपाकद्रव-**
**न्मृद्वीकामधुमाधुरीमदपरीवाहोद्धुराणां गिराम् ।**
**काव्यं तर्हि सखे सुखेन कथय त्वं सम्मुखे मादृशां**
**नो चेद्दुष्कृतमात्मना कृतमिव स्वान्ताद्बहिर्मा कृथाः ।। पृ. ७९.**

अत्र तृतीयचरणे काचित् वर्णरचना, चतुर्थचरणे च अन्यादृशी वर्णरचना इति नास्त्येव समता। कान्तिसौकुमार्ये तु ग्राम्यत्व-कष्टत्वलक्षणदोषपरित्यागस्वरूपे । प्रसादे च अर्थव्यक्तिः गतार्था । एवं शब्दगुणानां माधुर्यादित्रिगुणेषु अन्तर्भावः ।

**स्वावलोकनप्रश्नः**

१. जगन्नाथेन विंशति गुणानां गुणत्रये कैः कैः प्रकारैः अन्तर्भावः कृतः ?

२. शब्दगुणानां गुणत्रयान्तर्भावरूपा पट्टिका निर्मेया ?

३. समतायाः गुणत्वं कथं सम्भवति ? उदाहरणं किम् ?

**अर्थगुणेष्वपि—** श्लेषः ओजसः आद्यश्चत्वरः भेदाश्च वैचित्र्यरूपा एव, न प्रत्येकशः गुणपदव्यपदेश्याः । यावदर्थपदात्मकप्रसादः अधिकपदत्वरूपदोषाभावरूपः । उक्तिवैचित्र्यञ्च माधुर्यम् । आग्राम्यत्वरूपा उदारता तु ग्राम्यत्वरूपदोषपरिहारात्मिका । सौकुमार्यं तु अमङ्गलरूपदोषपरिहारात्मकम् । समता तु भग्नप्रक्रमपरिहाररूपा । साभिप्रायत्वात्मकः ओजसः पञ्चमप्रकारस्तु अपुष्टार्थत्वरूपदोषपररूपः । अर्थव्यक्तिः स्वभावोक्त्यलङ्कारः एव । दीप्तरसत्वात्मिका कान्तिः रसस्य प्राधान्ये रसध्वनिः । अन्यथा तु रसवदलङ्कारः । समाधिस्तु यदि काव्यगुणतया परिगण्येत, तर्हि प्रतिभायाः काव्यकारणभूतायाः काव्यगुणत्वेन परिगणनम् अवश्यं कर्तव्यं स्यात् । तस्मात् वामनोक्ताः अपि विंशतिर्गुणाः दोषभावे, दोषे अलङ्कारे, रसध्वनौ वैचित्र्ये माधुर्यौजःप्रसादात्मकेषु त्रिषु गुणेषु च अन्तीर्भवतीति मम्मटमतानुसारेण पण्डितराजस्य आशयः ।

**स्वावलोकनप्रश्नः**

१. वैचित्र्यरूपाः गुणाः के ?

२. माधुर्यं नाम किम् ?

३. रसस्य प्राधान्ये कः, अप्राधान्ये कः भवति ?

४. समाधिः कथं काव्यकारणम् ?

# VI. 5. पाठ्यांशेऽस्मिन् सम्भाविताः प्रश्नाः

## विंशत्यङ्कप्रश्नाः

1. गुणसामान्यस्वरूपं निरूप्य, गुणानां रसमात्रधर्मत्वं दूषयित्वा पण्डितराजोक्तदिशा रसादिधर्मत्वं सिद्धान्तयत ?
2. वामनोक्तशब्दगुणानां पण्डितराजोक्तदिशा लक्षणोदाहरणे विवेचयत ?
3. वामनोक्तानामर्थगुणानां लक्षणोदाहरणे पण्डितराजोक्तदिशा निरूपयत ?

## दशाङ्कप्रश्नाः

1. गुणसामान्यस्वरूपं निरूप्य तत्तद्रसेषु गुणतारतम्यं विवेचयत ?
2. गुणानां रसमात्रधर्मत्वं पण्डितराजोक्तदिशा दूषयत ?
3. गुणानां पण्डितराजोक्तं रसादिधर्मत्वं समर्थयत ?
4. मम्मटोक्तं त्रिगुणान्तर्भाववादं पण्डितराजोक्तदिशा विवेचयत ?

## पञ्चाङ्कप्रश्नाः

1. श्लेषः (शब्दगुणः)
2. प्रसादः (शब्दगुणः)
3. उदारता (शब्दगुणः)
4. ओजः (शब्दगुणः)
5. श्लेषः (अर्थगुणः)
6. समतामाधुर्ये (अर्थगुणौ)
7. ओजः (अर्थगुणः)

# VII. गुणाभिव्यञ्जकरचनादिमीमांसा

ध्वनिकारादिनवीनालङ्कारिकमार्गेण गुणाः सङ्क्षिप्तदृष्ट्या माधुर्य-ओजः-प्रसादाख्याः त्रयः। तत्र विभागेऽस्मिन्—

1. तत्तद्गुणाभिव्यञ्जकरचनास्वरूपम्
2. रचनाविषये सामान्यतो वर्जनीयाः
3. विशेषतो वर्जनीयाश्च निरूपयितुमिष्यन्ते ।

येषाञ्च परिज्ञानेन, येषाञ्च परिहारेण कविः वैदर्भीमार्गेण परिपाकवतीं रचनां निर्मातुं शक्नोति । रचनामर्मज्ञत्वमपि सहृदयेषु वर्धतेतराम् । अतः पूर्वोक्तविषयनिरूपणं कविसहृदययोरावश्यकमिति भामहादिप्राचीनालङ्कारिकमतम्, ध्वनिकारादिनवीनालङ्कारिकमतञ्च, आकलय्य तद्गुणाभिव्यञ्जकरचनादिकं पण्डितराजेन अत्यन्तश्रद्धया निरूपितम् । तत्रादौ माधुर्याभिव्यञ्जकरचना निरूप्यते ।

| **स्वावलोकनप्रश्नाः** |
| --- |
| १. अस्मिन्नंशे के के विषयाः प्रतिपाद्यन्ते ? |
| २. एतेषां विषयाणां ज्ञानेन केन मार्गेण रचना कर्तं शक्यते ? |

## VII. 1. तत्तद्गुणभिव्यञ्जकरचना

### VII. 1. i. माधुर्याभिव्यञ्जकरचना

तत्र टवर्गवर्जितानां वर्गाणां प्रथमतृतीयैः वर्णैः, शर्भिः **श-ष-स** इत्येतैः वर्णैः, अन्तस्थैः **य-र-ल-व** इत्येतैः वर्णैश्च घटिता, नैकट्येन प्रयुक्तैः अनुस्वारपरसवर्णैः शुद्धानुनासिकाक्षरैः

शोभिता, वक्ष्यमाणैः सामान्यतो विशेषतश्च निषिद्धैः संयोगाद्यैः अस्पृष्टा, अवृत्तिः-समासरहिता, मृदुवृत्तिर्वा आनुपूर्वीरूपा रचना माधुर्यगुणस्य अभिव्यञ्जिका । द्वितीयचतुर्थाः वर्ग्यवर्णाः दूरतः निवेशिताश्चेत् न प्रतिकूलाः न वा अनुकूलाः । त एव द्वितीयचतुर्थवर्णा नैकट्येन निवेशिताः प्रतिकूला भवन्ति, यदि च तदायत्तः अनुप्रासः । अन्ये तु वर्गस्थपञ्चमवर्णानां माधुर्यव्यञ्जकतामाहुः । यथा—

**तान्तमालतरुकान्तिलङ्घिनीं किङ्करीकृतनवाम्बुदत्विषम् ।**
**स्वान्त मे कलय शान्तये चिरं नैचिकीनयनचुम्बितां श्रियम् ।। पृ. ८०.**

अत्र पद्ये तमालतरुकान्तिलङ्घनादिना असम्बन्धेऽपि सम्बन्धकल्पनात्मकातिशयोक्त्यलङ्कारोपस्कृता, भगवद्ध्यानौत्सुक्यरूपव्यभिचारभावस्य, भगवद्विषयकरतेर्वा अभिव्यक्तायाः शान्त एव पर्यवसानात् **तान्त, किङ्क** इत्यादिवर्गपञ्चमाक्षरप्रथमाक्षरसंयोगे तुम्बुरुनादध्वनेरिव माधुर्यस्य अभिव्यञ्जनात् एषा माधुर्याभिव्यञ्जिका रचना । तथा—

**स्वेदाम्बुसान्द्रकणशालिकपोलपालि-**
**रन्तः स्मितालसविलोकनवन्दनीया ।**
**आनन्दमङ्कुरयति स्मरणेन कापि**
**रम्या दशा मनसि मे मदिरेक्षणायाः ।।**

अत्र स्मृत्यावष्टब्धः शृङ्गारः, **अम्बु-सान्द्र-कपोलपालि** इत्यादिश्रुतिसुभगसंयोगेन, अपरुषैर्मधुरैश्च वर्णैः व्यज्यते ।

**स्वावलोकनप्रश्नाः**

१. माधुर्याभिव्यञ्जकरचनायां वर्णनीयाः के ?

२. माधुर्याभिव्यञ्जकरचना कीदृशी स्यात् ?

३. उदाहरणद्वये माधुर्याभिव्यञ्जकरचना कथं समन्वेति ?

४. **तान्तमाल** इत्यादिश्लोके कः रसः ?

५. **स्वेदाम्बुसान्द्रकणशालि** इत्यादिश्लोके कः रसः ?

## VII. 1. ii. ओजोऽभिव्यञ्जकरचना

नैकट्येन द्वितीयचतुर्थवर्गवर्णैः, टवर्गेन, जिह्वामूलीयेन, उपध्मानीयेन, विसर्गेण, सकारेण च बहुलैः वर्णैः झय्रेफान्तरघटितसंयोगपरह्रस्वैश्च नैकट्येन प्रयुक्तैः ओजसः अभिव्यञ्जिका रचना प्रयुज्यते । सा च दीर्घवृत्त्यात्मिका प्रथम-तृतीयवर्गवर्णाः संयोगाघटका चेत् न ओजसः प्रतिकूलाः न च अनुकूलाः, त एव संयोगप्रविष्टाश्चेत् अनुकूला एव । एवम् अनुस्वारपरसवर्णा अपि संयोगाघटकाः चेत् उदासीना एव । यथा-

**अयम्पततु निर्दयन्दलितदृप्तभूभृद्गलत् ।**
**स्खलत् रुधिरघस्मरो परश्वथो भैरवः ।।**

इत्यादिरौद्राभिव्यञ्जकरचनायां झय्संयोगादिघटितत्वात् ओजसः अभिव्यक्तिः ।

**स्वावलोकनप्रश्नाः**

१. ओजोऽभिव्यञ्जकरचनायां प्रतिकूलाः के ?

२. ओजोऽभिव्यञ्जकरचनायाम् उदासीनाः के ?

३. ओजोऽभिव्यञ्जकरचनायाम् अनुकूलाः के ?

४. ओजोऽभिव्यञ्जकरचनायाः उदाहरणे कथं समन्वयः ?

## VII. 1. iii. प्रसादाभिव्यञ्जकरचना

या घटना श्रुतमात्रा वाक्यार्थं करतलबदरमिव निवेदयति, सा प्रसादस्य अभिव्यञ्जिका घटना । अयञ्च सर्वसाधारणो गुणः, उदाहरणानि तु प्रायशः पण्डितराजस्य सर्वाण्येव पद्यानि । यथा—

**चिन्तामीलितमानसो मनसिजः सख्यो विहीनप्रभाः**
**प्राणेशः प्रणयाकुलः पुनरसावस्तां समस्ता कथा ।**
**एतत्त्वां विनिवेदयामि मम चेदुक्तिं हितां मन्यसे**
**मुग्धे मा कुरु मानमाननमिदं राकापतिर्जेष्यति ।।**

अत्र श्लोके सर्वावच्छेदेन रचनायां प्रसादाभिव्यञ्जकता । अंशभेदेन तु माधुर्य-ओजोऽभि-व्यञ्जकत्वमपि दृश्यते । तत्र **चिन्तामीलितमानसो मानसिजः** इत्यत्र **मा कुरु** इत्यत्र च माधुर्याभिव्यञ्जकरचना । **सख्यो विहीनप्रभाः** इत्यत्र तु बहुधा अनुनीताया अपि सख्याः अनिवर्तिनः कोपस्याभिव्यञ्जकतया महाप्राणाक्षरसंयोगस्य उपयुक्तत्वात् ओजोऽभिव्यञ्जिका रचना । यथा—

**वाचा निर्मलया सुधामधुरया यां नाथ शिक्षामदा-**
**स्तां स्वप्नेऽपि न संस्पृशाम्यहमहम्भावावृतो निस्त्रपः ।**
**इत्यागश्शतशालिनं पुनरपि स्वीयषु मां बिभ्रत-**
**स्त्वत्तो नास्ति दयानिधिर्यदुपते ! मत्तो न मत्तः परः ।।**

इति पद्ये तु गुणान्तरासमानाधिकरणः प्रसादः, माधुर्येण ओजसा वा अमिश्रितत्वात् ।

एवं तत्तद्गुणाभिव्यञ्जकरचनायां निरूपितायां सामान्यतो विशेषतश्च वर्जनीयाः निरूपणीयाः । तत्रादौ सामान्यतो वर्जनीयाः निरूप्यन्ते ।

**स्वावलोकनप्रश्नाः**

१. प्रसादाभिव्यञ्जकरचनायाः किं लक्षणम् ?

२. प्रसादाभिव्यञ्जकरचनायाः किं उदाहरणम् ?

३. उदाहरणे कुत्र प्रसादः ? कुत्र ओजः भवति ?

४. **वाचा निर्मलया** इति पद्यं पूर्वोदाहरणात् कथं विलक्षणम् ?

## VII. 2. सामान्यतो वर्जनीयाः

i. वर्णानां सवर्णानन्तर्यं सकृत् एकपदगतत्वे किञ्चित् अश्रव्यम् । यथा— **ककुभसुरभिः, विततगात्रः, पललमिवाभाति** इत्यादौ **ककु, तत, लल** इति सवर्णानन्तर्यम् एकपदगतत्वे अत्र किञ्चित् अश्रव्यम् ।

ii. तदेव सवर्णानन्तर्यम् असकृच्चेत् अधिकमश्रव्यम् । यथा—

**विततततरस्तरुरेष भाति भूमौ ।**

iii. भिन्नपदगतत्वेन सकृत् सवर्णानन्तर्यमपि रचनायाः अश्रव्यतापादकम् । यथा—

**शुक करोषि कथं विजने रुचिम् ।**

iv. असकृत् भिन्नपदगतत्वे तातोऽपि अधिकमश्रव्यं भवति । यथा—

**पिक ककुभो मुखरीकुरू प्रकामम् ।** इति ।

v. स्वसमानवर्गानन्तर्यं सकृत् एकपदगतत्वे किञ्चित् अश्रव्यम् । यथा— **वितथस्ते मनोरथः** इत्यत्र स्ववर्गयोः तथयोः सकृदानन्तर्यम् ।

vi. समानवर्गानन्तर्यमेव भिन्नपदगतत्वे यथा— **अथ तस्य वचश्श्रुत्वा ।**

vii. असकृत् भिन्नपदगतं सवर्गानन्तर्यं ततोऽप्यधिकम् । यथा— **अथ तथा कुरु येन सुखं लभे** एषु प्रथमद्वितीययोः तथा तृतीयचतुर्थयोः आनन्तर्यम् उदाहृतम् ।

एवमश्रव्यतापरिहारोपायाः अपि पण्डितराजेन केचिदुक्ताः ।

**(अ)** तत्र प्रथमतृतीययोः द्वितीयतृतीययोर्वा आनन्तर्यं तथा न श्रव्यम्, किन्तु तद्गतम् अश्रव्यत्वं निर्माणमार्मिकवेद्यं भवति । यथा— **खगकलानिधिरेष विजृम्भते** अत्र **खग** इत्यत्र

द्वितीयतृतीययोः नैरन्तर्यम् अश्रव्यत्वं निर्माणमार्मिकवेद्यम् । एवम् **इति वदति दिवानिशं धन्यः** इत्यत्र वदति दिवा इति प्रथमतृतीययोः अश्रव्यत्वं तादृशमेव[1] ।

**(आ)** पञ्चमाक्षराणां मधुरत्वेन स्ववर्गानन्तर्यं न दोषाय । यथा– **तनुते तनुतां तनौ** ।

viii. स्ववर्गानन्तर्यं तु अश्राव्यमेव। यथा– **मम महती मनसि व्यथाविरासीत्** इति ।

**(इ)** एतादृशाश्राव्यत्वं गुरुव्यवायेन अपोह्यते। यथा– **स जायतां कथङ्कारं कोके केकाकलस्वनः** अत्र स्वानन्तर्यस्य सत्त्वेऽपि दीर्घव्यवधानात् न दोषः ।

**(ई)** एवम् **तथा तथा तत्त्वकथेन सर्वतो विकृष्य माम् एकरसं चकार सा** इत्यत्राऽपि स्ववर्ग्यानन्तर्यस्य दीर्घव्यवधानात् न दोषः ।

**(उ)** एवं संयोगपरव्यवायेऽपि न दोषः । यथा– **रणाङ्गणमिवाभाति तत्तत्तुरागताण्डवैः** इत्यत्र संयोगपरव्यवधानात् स्ववर्ग्यानन्तर्यं न दोषाय ।

इदन्तु बोध्यम् । यद्यपि दीर्घव्यवायः स्ववर्ग्यानन्तर्यकृताश्रव्यत्वस्य विघातुकः । तथापि ययोः स्ववर्ग्ययोः दीर्घाक्षरव्यवायः अस्ति, तत्र अश्रव्यत्वदोषपरिहारः कामं भवति। यत्र तु दीर्घाक्षरव्यवायः नास्ति स्ववर्ग्ययोः, तत्र दोष एव । यथा— **तथा** इत्यत्र तथयोः ।

ix. एवं संयोगपरव्यवायः यद्यपि दोषनिवारकः, तथापि त्र्यादीनां संयोगः, श्रुतिकटुत्वापादक एव। यथा— **राष्ट्रे तवोष्ट्र्यः परितश्चरन्ति** इत्यादौ ।

x. एवं भिन्नपदगतस्य संयोगस्य दीर्घान्तर्यं सकृदप्यश्रव्यम् । असकृत्तु सुतराम् । यथा-

**हरिणीप्रेक्षणा यत्र गृहिणी न विलोक्यते ।**
**सेवितं सर्वसम्पद्भिः अपि तद्भवनं वनम् ।।**

अत्र **णीप्रेक्ष** इति भिन्नपदगतं दीर्घानन्तर्यं सकृदपि दोषाधायकम् अश्रव्यमेव भवति ।

xi. एकपदगतस्य तु न श्रव्यत्वम् । यथा– **जाग्रता विचितः पन्थाः शात्रवानां वधोद्यमः** इत्यत्र जाग्रता इति संयोगस्य एकपदवर्तिनः दीर्घानन्तर्यं न दोषाय ।

---

1. अत्र **(अ)**, **(आ)**.... इत्यादि **(ऋ)**पर्यन्तं संख्याभेदः प्रत्येकशः अश्रव्यतापवादसूचनाय ।

**(ऊ)** परसवर्णकृतस्य संयोगस्य तु दीर्घात् भिन्नपदगतत्वाभावेन मधुरत्वेन च आनन्तर्यं दोषाय । यथा– **तान्तमालतरुकान्तिलङ्घिनीम् किङ्करीकृतनवाम्बुदत्विषम्** अत्र– **तान्त** इत्यत्र **नीङ्क** इत्यत्र, परसवर्णेन नकारेण ङकारेण वा कश्चित् संयोगः निष्पन्नः । तादृशपरसवर्णस्य च पूर्वपदभक्ततया न संयोगः भिन्नपदगतः । यतो हि स संयोगः अंशतः पूर्वपदस्य, उत्तरपदस्य च भवति । अतः भिन्नपदगतसंयोगनैकट्यस्य दीर्घाक्षरे अभावात् नात्र अश्रव्यत्वम् ।

यदि च संयोगसंज्ञा न समुदायवृत्तिः, अपि तु व्यासज्यवृत्तिः भवति, तदापि उत्तरपदगत-तकारस्य संयोगसंज्ञायाः सद्भावेऽपि दीर्घाक्षरस्य संयोगान्तरेण नकारेण व्यवधानात् दीर्घसंयोगयोः नैकट्यप्रयुक्तम् अश्रव्यत्वम् । न च नकारस्यापि संयोगसंज्ञायाः सद्भावात् तस्य दीर्घसन्निहितत्वेन अश्रव्यत्वमेवेति वाच्यम्। नकारस्य संयोगसंज्ञाश्रयत्वेऽपि तस्य भिन्नपदगतत्वाभावे अश्रव्यत्वदोषाभावात् ।

**(ऋ)** एवम् **नवाम्बुदत्विषम्** इत्यत्र एकादेशस्य सवर्णदीर्घस्य पदद्वयभक्तत्वेन दीर्घात् भिन्नपदगतत्वस्य संयोगे अभावात् तत्रापि न अश्रव्यत्वदोषः ।

xii. दीर्घात् भिन्नपदगतसंयोगस्य असकृत् श्रवणे महत् अश्रव्यत्वम् । यथा– **एषा प्रिया मे क्व गता त्रपाकुला** अत्र– **षा प्रि, ता त्र** इत्यत्र दीर्घनैकट्यस्य विशिष्टस्य संयोगस्य सद्भावात्, अश्रव्यत्वं दोष एव । एतच्च अश्रव्यत्वं काव्यस्य पङ्गुत्वम् आपादयति ।

xiii. अथ स्वेच्छया सन्ध्यकरणं सकृदपि अश्रव्यम् । यथा— **रम्याणि इन्दुमुखि ते किलिकिञ्चितानि ।**

xiv. प्रगृह्यप्रयुक्तम् असकृत् सन्ध्यकरणं दोषापादकमेव । यथा– **अहो अमी इन्दुमुखीविलासाः** अत्र– **अहो, अमी** इत्यत्र **ओत्** इति सूत्रेण ओदन्तनिपातस्य प्रगृह्यसंज्ञाया सन्ध्यभावः, एवम् **अमी इन्दुमुखी** इत्यत्र **अदसो मात्** इति सूत्रेण प्रगृह्यसंज्ञया सन्ध्यभावः । एवम् असकृत् प्रकृतिभावकरणमपि अश्रव्यतामापादयति ।

xv. एवमेव यवलोपप्रयुक्तं सन्ध्यकरणमपि दोषायैव। यथा— **अपर इषव एते कामिनीनां दृगन्ताः** इत्यादौ ।

कथं तर्हि **तारा इव तुरगा इव सुखलीनाः मन्त्रिणो भवतः** इति पद्ये यलोपप्रयुक्तसन्ध्यभाव एव द्विवारं कथं घटते इति चेत्– **यलोपम् अकृत्वैव पाठात् न दोषः** इति पण्डितराजस्य समाधानम् ।

xvi. एवं रोरुत्वस्य हलि लोपस्य यण्-गुण-वृद्धि-सवर्णदीर्घ-पूर्वरूपादीनाञ्च नैकट्येन बाहुल्यम् अश्रव्यताहेतुः । एवम् एते अश्रव्यताभेदाः काव्यसामान्ये वर्जनीयाः ।

**स्वावलोकनप्रश्नाः**

१. सामान्यतो वर्जनीयाः कति भवन्ति ?

२. **वितततरस्तरुरेष भाति भूमौ** इत्यत्र कः दोषः ?

३. स्वसमानवर्गानन्तर्यस्य उदाहरणं किम् ?

४. **समानवर्गानन्तर्यं भिन्नपदगतम् अश्रव्यम्** इत्यस्य उदाहरणं किम् ?

५. अश्रव्यपरिहारोपायाः कति ?

६. **हरिणीप्रेक्षणा** इत्युदारणं कस्य भवति ?

७. **तारा इव तुरगा इव** इत्यत्र सन्ध्यभावदोषः जगन्नाथेन कथं वारितः ?

इदानीं विशेषतो वर्जनीयान् अवगच्छामः ।

# VII. 3. विशेषतो वर्जनीयाः

तत्र मधुररसेषु ये विशेषतः वर्जनीयत्वेन वर्ण्यन्ते, त एव ओजस्विषु अनुकूलाः । ये च मधुरेषु अनुकूलतया उक्ताः त एव ओजस्विषु प्रतिकूलाः इति सामान्यतो निर्णयः । तत्र मधुररसेषु दीर्घसमासः झय्घटितसंयोगपरह्रस्वाक्षराणि, विसर्जनीयादेशसकारः, जिह्वामूलीयम्, उपध्मानीयः, हलां ल-म-न भिन्नानां स्वात्मना संयोगः, झय्घटितसंयोगः इत्येषामसकृत्प्रयोगं नैकट्येन वर्जयेत् । सवर्णझय्द्वयघटितसंयोगः शर्भिन्नमहाप्राणघटितसंयोगश्च सकृदपि न कार्यः ।

i. **लोलालकावलिवलसन्नयनारविन्दलीलावशंवदितलोकविलोचनायाः** इत्यादिपद्ये नायिकावर्णनात्मके दीर्घसमासरचना **माधुर्यस्य प्रतिकूला** ।

ii. **झय्घटितसंयोगपरह्रस्वानां प्राचुर्यं नैकट्येन यथा—**

**हीरस्फुरद्रदनशुभ्रिमशोभि किञ्च ।**
**सान्द्रामृतं वदनमेणविलोचनायाः ।। पृ. ९६.**

इत्यादिपद्येऽपि **'रद्र, शुभ्रि'** इत्यत्र **नैकट्येन झय् घटितसंयोगयोः** उपयोगात् शृङ्गाररसाननुगुणत्वम् ।

iii. **विसर्गप्राचुर्यं यथा—**

**सानुरागास्सानुकम्पाश्चतुराश्शीलशीतलाः** इत्यत्र शकारद्वयसंयोगान्तं माधुर्याननुगुणम् ।

iv. **जिह्वामूलीयप्राचुर्यं यथा—**

**कलितकुलिशघाताः केऽपि खेलन्ति वाताः कुशलमिह कथं वा जायतां जीविते मे** अत्र **घाताः, वाताः** इत्यत्र जिह्वामूलीयप्राचुर्यम् अश्रव्यम्।

v. **उपध्मानीयप्राचुर्यं यथा—**

**अलकाः फणिशावतुल्यशीलाः नयनान्ताः परिपुङ्खितेषु लीलाः ।**
**चपलोपमिता खलु स्वयं या बत लोके सुखसाधनं कथं सा ।।**

अत्र द्वावपि उपध्मानीयौ शान्तरसाननुगुणौ ।

vi. **टवर्गझयां प्राचुर्यं यथा—**

ठकारस्य **अधुना हरिणा हि हा कथं वा कटुता तत्र कठोरता आविरासीत्** इति पद्ये टकारस्य च माधुर्याननुगुणत्वम् ।

vii. **रेफघटितसंयोगस्य असकृत्प्रयोगे यथा—**

**तुलामानालोक्य निजामखर्वं गौराङ्गि गर्वं न कदापि कुर्याः** इत्यत्र रेफघटितसंयोगस्य असकृत्प्रयोगात् माधुर्यस्य अभिव्यक्तिः न भवति— **तुलामानालोक्य महीतलेऽस्मिन्** इति निर्मीयेत चेत्, सुकरमेव माधुर्यस्य अभिव्यञ्जनम् ।

viii. **ल-म-न भिन्नानां** स्वात्मना संयोगस्य असकृत्प्रयोगः पारुष्यमावहति। यथा— **विगणय्य मे निकाय्यं तामनुयातोऽसि नैव तन्न्याय्यम्** अत्र यकारस्य स्वात्मसंयोगः असकृत् कृतः पारुष्यमावहति । **इयमुल्लसिता मुखस्य शोभा परिफुल्लं नयनाम्बुजद्वयं ते** इत्यादौ लकारस्य स्वात्मसंयोगः माधुर्यं स्फुटयति ।

ix. **झय्द्वयघटितसंयोगस्य असकृत्प्रयोगः यथा—**

**अधुनाब्जेन मनाक्तव मानिनि तुलना मुखस्याप्ता** —इत्यत्र **तव, स्याप्ता** इति भागयोः झय्द्वयघटितसंयोगस्य अश्रव्यत्वम् ।

x. **एवं सवर्णझय्द्वयघटितसंयोगः सकृत्** प्रयुज्यमानोऽपि वैरस्यामावहति । यथा— **वदनं तन्वङ्गि यदि मानाक्कुरुषे** इत्यादौ ।

xi. **तथा महाप्राणघटितसंयोगः यङन्तानि यङ्लुगन्तानि** इत्येवं शाब्दिकप्रियाणि मधुररसे न प्रयुञ्जीत ।

xii. एवं व्यङ्ग्यचर्वणातिरिक्तयोजनाविशेषापेक्षान् अधिकचमत्कारिणः अनुप्रासनिचयान् **यमकादींश्च कविः न निबध्नीयात् ।** यतः ते यमकादयः अलङ्काराः रसचर्वणायाम् अनन्तर्भवन्तः सहृदयहृदयं स्वाभिमुखं विदधाना तं **रसपराङ्मुखं** विदधीरन् । विप्रलम्भे तु सुतराम् । यतस्तत्र माधुर्यमधिकम्। यमकादिप्रयोगे माधुर्यप्रतिपक्षभूता अरुन्तुदतापि अधिकैव भविष्यति । ततश्च—

**ध्वन्यात्मभूते शृङ्गारे यमकादिनिबन्धनम् ।**
**शक्तावपि प्रमादित्वं विप्रलम्भे विशेषतः ।।**

इति ध्वनिकारोक्तिमनुसृत्य यमकत्याग एव कर्तव्यः । अतः ***माधुर्यगुणस्य आदर्शप्रायरचना*** इत्थं भवेत्—

**आयातैव निशा निशापतिकरैः कीर्णं दिशामन्तरं**
**भामिन्यो भवनेषु भूषणगणैरुल्लासयन्ति श्रियम् ।**
**वामे मानमपाकरोषि न मनागद्यापि रोषेण ते**
**हा हा बालमृणालतोऽप्यतितमां तन्वी तनुस्ताम्यति ।।**

एवं रचनायां समादृतायामेव वैदर्भी रीतिः काव्यार्थपरिपाकश्च अवश्यं भवेत् । अन्यथा तु परिपाकभङ्ग एव स्यात्। एतादृशरचनानियमपालनं रचनायाः ***माधुर्याभिव्यञ्जनक्षमतां संवर्धयतीति हेतोरेव,*** सन्दर्भेऽस्मिन् पण्डितराजः अमरुककविमपि विमृष्टवान् । यथा अमरुककविपद्ये—

**शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै-**
**र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।**
**विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं**
**लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ।। पृ. ९१.**

अत्र **उत्थाय, किञ्चिच्छनैः** इत्यत्र सवर्णझयुद्वयसंयोगः सुतरां नैकट्येन अश्रव्यः । तथा झयुघटितसंयोगपरह्रस्वस्यापि अश्रव्यत्वम् तथा **शनैर्निद्रा, निर्वर्ण्य पत्युर्मुखम्** इत्यत्र रेफघटितसंयोगस्य संयोगपरह्रस्वप्राचुर्यस्य च प्रयोगः दृश्यते । एवं विस्रब्धम् इत्यत्र महाप्राणघटितसंयोगः, लज्जा इत्यत्र स्वात्मकसवर्णझयुद्वयघटितसंयोगः, **मुखी प्रियेण** इत्यत्र भिन्नपदगतदीर्घानन्तरस्य संयोगः, **विलोक्य, उत्थाय, निर्वर्ण्य, परिचुम्ब्य, आलोक्य** पञ्चकृत्वः क्त्वा प्रत्ययस्य प्रयोगः, **विलोक्य, आलोक्य** इति लोकतेर्धातोः द्विः प्रयोगश्च कवेः निर्माणसामग्रीदारिद्र्यं प्रकाशयति, इति वास्तविकदृक्पथमनुरुन्धानेन पण्डितराजेन प्रबन्धशतायितैकैकश्लोकः अमरुकोऽपि कविः विमृष्टः इति शम् ।

**स्वावलोकनप्रश्नाः**

१. मधुररसाः के ?

२. ओजस्विरसाः के ?

३. मधुररसेषु के वर्जनीयाः ?

४. ओजस्विरसेषु के वर्जनीयाः ?

५. जिह्वामूलीयम्, उपध्मानीयम् च नाम किम् ?

६. किं पारुष्यमावहति ?

७. विशेषतो वर्जनीयाः कति जगन्नाथेन दर्शिताः ?

८. शाब्दिकप्रियाणि कानि भवन्ति ?

९. कविः कान् कुत्र निबध्नीयात् ?

१०. यमकादयः रसचर्वणायां किं विदधीरन् ?

११. माधुर्यप्रियस्य आदर्शप्रायकविता का ?

१२. **शून्यं वासगृहम्** इत्यादिपद्यं कस्य कवेः भवति ?

१३. अत्र जगन्नाथेन कतिषु स्थलेषु दोषाः दर्शिताः ?

१४. अस्मिन् पक्षे रचना कवेः किं सूचयति ?

# VII. 4. पाठ्यांशेऽस्मिन् सम्भाविताः प्रश्नाः

## विंशत्यङ्कप्रश्नाः

1. पण्डितराजोक्तदिशा माधुर्य-ओजः-प्रसादाभिव्यञ्जकरचने विवेचयत ?
2. रचनायां सामान्यतो वर्जनीयान् वर्णयत ?
3. रचनायां विशेषतो वर्जनीयान् निरूपयत ?

## पञ्चाङ्कप्रश्नौ

1. **शून्यं वासगृहम्...** इत्याद्यमरुकपद्ये पण्डितराजेन परिशीलिताः रचनानुगुण विषयाः के ?
2. **तान्तमाल...** इत्यादिपद्ये पण्डितराजेन कृतम् अश्रव्यतापरिहारोपायं सूचयत ?

# VIII. भावमीमांसा

विभागेऽस्मिन्—

1. भावलक्षणविचारः
2. भावाभिव्यक्तौ मतभेदाः
3. भावाभिव्यञ्जकसामग्री
4. भावसंख्या
5. कतिपयभावानां लक्षणोदाहरणे
6. कतिपयभावनां पारस्परिको भेदः
7. भावानां पदप्रकाश्यत्वम्
8. भावानां रसानां च भेदः

इत्यमी विषयाः निरूपयिष्यन्ते ।

**स्वावलोकनप्रश्नः**

१. अस्मिन् पाठ्यांशे के विषयाः विवेचनीयाः ?

## VIII. 1. भावलक्षणविचारः

किं नाम भावत्वम् ? इति प्रश्नमुत्तरयन् पण्डितराजः— **विभावादिव्यज्यमान-हर्षाद्यन्यतमत्वं तत्त्वम्** इत्याह । **विभावानुभावैः व्यज्यमानः हर्षादिचतुस्त्रिंशदन्यतमः भावः** —इति तस्यार्थः । तत्र हर्षादयः निर्वेदान्ताः त्रयस्त्रिंशत् व्यभिचारिणः, गुरुदेवनृपपुत्रादिविषया रतिश्च इत्याहत्य भावाः चतुस्त्रिंशत् । एतदन्यतमत्वमेव भावत्वम् ।

एवम् अन्यतमत्वघटितत्वेन लक्षणं गत्यन्तराभावादेव पण्डितराजेन परिष्कृतम्। एतल्लक्षणनिरूपणात् प्राक् पण्डितराजेन भावस्य लक्षणद्वयम्, अखण्डोपाधित्वञ्च उद्भाव्य दूषितम् । तत्र—

i. **विभावानुभावभिन्नत्वे सति रसाभिव्यञ्जकत्वम्** एकं लक्षणम् ।

ii. **रसाभिव्यञ्जकचर्वणाविषयचित्तवृत्तित्वम्** इति च द्वितीयलक्षणम् । एतत् उभयमपि न सङ्गच्छते।

**स्वावलोकनप्रश्नाः**

१. भावस्य पण्डितराजपरिष्कृतं लक्षणं किम् ?

२. भावाः चतुस्त्रिंशत् कथं भवन्ति ?

३. भावस्य पूर्वपक्षीये लक्षणे के ?

## VIII. 1. i. तत्र नाद्यः

**विभावानुभावभिन्नत्वे सति रसाभिव्यञ्जकत्वम्** —इति यदि लक्षणमुच्येत, रसकाव्यवाक्ये अतिव्याप्तिः । तत्रापि वाक्यात्मकस्य शब्दस्य अर्थद्वारा रसाभिव्यञ्जकत्वात्, विभावानुभावभिन्नत्वाच्च । न च **द्वारान्तरनिरपेक्षत्वेन रसव्यञ्जकत्वम्** इति परिष्करणात् रसकाव्यवाक्ये नातिव्याप्तिः, शब्दस्य अर्थद्वारेणैव रसाभिव्यञ्जकत्वात् इति वाच्यम्। तथा सति भावलक्षणस्य सर्वत्रैव असम्भवः स्यात् । भावस्यापि भावनाद्वारैव रसाभिव्यञ्जकत्वात्, द्वारान्तरनिरपेक्षत्वेन रसाभिव्यञ्जकत्वाभावाच्च । भावनायाम् अतिव्याप्तिश्च । भावनायाः द्वारान्तरनैरपेक्ष्येण रसाभिव्यञ्जकत्वात्, विभावानुभावभिन्नत्वाच्च ।

यदि च पूर्वोक्तलक्षणे शब्दभिन्नत्वं निवेश्येत, यद्यपि रसकाव्यवाक्ये न अतिव्याप्तिः । तथापि शब्दभिन्नत्वदलदानेऽपि भावनायामतिव्याप्त्यापत्तिः अनिवार्या । तस्यापि विभावानुभावभिन्नत्वात्, शब्दभिन्नत्वात् द्वारान्तरनिरपेक्षतया रसाभिव्यञ्जकत्वाच्च । किञ्च यत्र भाव एव प्रधानतया ध्वन्यते तत्र रसे कवितात्पर्याभावात् रसाभिव्यञ्जकत्वाभावात्, अव्याप्तिश्च प्रसज्येत । न च तत्रापि भावध्वनौ प्रान्ते रसाभिव्यक्तेः रसाभिव्यञ्जकत्वम् अस्त्येवेति वाच्यम् । भावध्वनिविलोपप्रसङ्गात् । यत्र भावचमत्कारप्रकर्षः तत्र भावध्वनित्वस्यैव न्याय्यत्वात् चमत्काररहितरसाभिव्यक्तौ प्रमाणाभावाच्च ।

अथ प्रान्ते ध्वन्यमानस्य भावस्य भावध्वनिस्थले रसाभिव्यञ्जकत्वस्वीकारेण दोषवारणेऽपि, देशकालवयोवस्थादिनानापदार्थघटिते पद्यवाक्यार्थे अतिव्याप्तिः तदवस्थैव । तत्रापि विभावानुभावभिन्नत्वस्य शब्दभिन्नत्वस्य रसाभिव्यञ्जकत्वस्य च सत्त्वात् ।

**स्वावलोकनप्रश्नाः**

१. द्वारान्तरनिरपेक्षितत्वं नाम किम् ?

२. भावलक्षणे द्वारान्तरनिरपेक्षितत्वे को दोषः ?

३. शब्दभिन्नत्वदलनिवेशे कुत्र अतिव्याप्तिः ?

## VIII. 1. ii. न द्वितीयः

**रसाभिव्यञ्जकचर्वणाविषयचित्तवृत्तित्वम्** इति द्वितीयभावलक्षणस्वीकारे—

**कालागुरुद्रवं सा हालाहलवत् विजानती नितराम् ।**
**अपि नीलोत्पलमालां बाला व्यालावलिं किलातनुते ।। पृ. ९३.**

इत्यत्र हालाहलसदृशत्वप्रकारकज्ञाने रसाभिव्यञ्जकचर्वणाविषयचित्तवृत्तित्वस्य सत्त्वेन तत्र अतिव्याप्तिः। अत्र हि कालागुरुद्रवस्य हालाहलसदृशत्वेन ग्रहणं विप्रलम्भपरिपोषकम् । अतः तादृशज्ञाने रसाभिव्यञ्जक-चर्वणाविषयत्वं चित्तवृत्तित्वञ्च अस्ति इति तत्र अतिव्याप्तिः। अतः द्वितीयलक्षणमपि न युज्यते ।

न च भावत्वम् अखण्डोपाधिः, प्रमाणाभावात् । तस्मात् **विभावादिव्यज्यमानहर्षाद्यन्यतमत्वमेव भावत्वम्** हर्षाद्यन्यतमत्वकथनात् रसकाव्यवाक्ये हालाहलसदृशत्वप्रकारकज्ञाने, देशकालादिघटितपद्यवाक्यार्थे वा नातिव्याप्तिः । **रसाभिव्यञ्जक** इति पदानुपयोगाच्च न भावध्वनौ असम्भवः । वाच्यहर्षादेः वारणार्थञ्च विभावादिव्यज्यमानेति दलम् ।

**स्वावलोकनप्रश्नाः**

१. **रसाभिव्यञ्जकचर्वणाविषयचित्तवृत्तित्वं भावस्य लक्षणम्** इति स्वीकारे कुत्रातिव्याप्तिः ?

२. **भावत्वम् अखण्डोपाधिः** इति स्वीकारे को दोषः ?

३. परिष्कृतलक्षणे **विभावादिव्यज्यमान** इति दलं कुतो निवेशितम् ?

एवं भावलक्षणे ज्ञाते भावाभिव्यक्तौ मतभेदान् जानीमः ।

## VIII. 2. भावाभिव्यक्तौ मतभेदाः

भावलक्षणे विभावादिव्यज्यमानत्वं विशेषणतया निवेशितम्। तत्र भावानामभिव्यक्तिः कथं जायते— इत्युक्ते पण्डितराजेन त्रीणि मतानि प्रस्तुतानि—

i. स्थायिभावन्यायेन अभिव्यक्तिः

ii. रसन्यायेन अभिव्यक्तिः

iii. व्यङ्ग्यान्तरन्यायेन अभिव्यक्तिः ।

### VIII. 2. i. स्थायिभावन्यायेनाभिव्यक्तिः

हर्षादीनां भावानां रत्यादिवत् वासनात्मना अवस्थितानामेव चर्वणया अभिव्यक्तिः इति प्रथमः पक्षः ।

### VIII. 2. ii. रसन्यायेन अभिव्यक्तिः

यथा हि अलौकिकव्यापारेण रत्याद्यवच्छिन्नस्य चैतन्यस्य आनन्दांशे आवरणभङ्गे जाते भग्नावरणचैतन्येन साकं रत्यादेः अभिव्यक्तिः, एवमेव भावाद्यवच्छिन्नचैतन्ये आनन्दांशावरणभङ्गे जाते भग्नावरणकचैतन्यात्मना हर्षादेः भावस्याभिव्यक्तिः इति द्वितीयं मतम्।

## VIII. 2. iii. व्यङ्ग्यन्तरन्यायेन अभिव्यक्तिः

**अपरे तु** वस्त्वलङ्कारादिरूपं रसभिन्नं व्यङ्ग्यं वक्तृबोद्धव्यादिवैशिष्ट्यवशात् यथा प्रकाशते, तथैव हर्षादयः अपि भावाः प्रकाशन्ते । एवञ्च एतन्मतानुसारेण वासनाविकासः नास्ति इति फलितम् ।

**स्वावलोकनप्रश्नाः**

१. भावाभिव्यक्तौ मतभेदाः कति ? के च ते ?

२. स्थायिभावन्यायेन अभिव्यक्तिः कथम् ?

३. रसन्यायेनाभिव्यक्तिः कथम् ?

४. व्यङ्ग्यान्तरन्यायेन अभिव्यक्तिः कथम् ?

# VIII. 3. भावाभिव्यञ्जकसामाग्री

रसे विभावानुभावव्यभिचारिणः **व्यञ्जकाः** इति प्रसिद्धम् । एवं हर्षादीनामभिव्यक्तौ के व्यञ्जका इत्युक्ते **विभावानुभावौ चात्र व्यञ्जकौ** इति पण्डितराजस्य समाधानम् । विभावः व्यज्यमानस्य व्यभिचारिभावस्य निमित्तकारणसामान्यमेव, न रसविषय इव सर्वथा आलम्बनोद्दीपनात्मा अपेक्षितः । अनुभावश्च अनुभावकचेष्टादिरूपः । व्यभिचारभावस्तु रसव्यक्ताविव भावध्वनिव्यक्तौ नियततया नापेक्ष्यते । यदि नियततया रसध्वनिविषय इव एकस्य व्यभिचारिणो व्यक्तौ व्यभिचार्यन्तरस्य अपेक्षितत्वम्, तर्हि तस्य नैयत्यलक्षणप्राधान्यापत्त्या अङ्गभूतभावस्यापि ध्वनित्त्वापत्तिः । अतः भावध्वनौ व्यभिचार्यन्तरं व्यञ्जकतया नैयत्येन नापेक्ष्यते।

वस्तुतस्तु भावध्वनिविषये भावस्य भावान्तरव्यञ्जकत्वेऽपि प्रकरणादिवशात् कस्यचिदेव भावस्य प्राधान्यात् तुल्यभावसामग्र्या अभिव्यक्ते नान्तरीयके अनुनिष्पादिनि भावान्तरे प्राधान्यायोगात्, अङ्गतया भावस्य व्यक्तावपि न ध्वनित्वम् । यथा– परावहेलनात्मकगर्वभावाभिव्यक्तस्य

मनोवाक्पारुष्यादिकारणीभूतचित्तवृत्तिविशेषात्मकस्य अमर्षस्य अथवा तादृशामर्षात्मकभावव्यक्तस्य गर्वस्य । तत्र गर्वे प्रधाने सति अमर्षस्य अङ्गत्वम्, अमर्षे प्रधाने सति गर्वस्याङ्गत्वम् ।

न च ध्वनित्वाभावेऽपि अप्रधानतया अभिव्यक्तत्वात् गुणीभूतव्यङ्ग्यत्वापत्तिरिति वाच्यम् । पृथक् विभावानुभावाभिव्यक्तस्य भावस्य गुणीभूतव्यङ्ग्यत्वव्यपदेशहेतुत्वात् तुल्यसामग्रीव्यक्तयोः भवयोर्मध्ये तु अन्यतरस्य प्राधान्येन ध्वनित्वेऽपि, अन्यतरस्य केवलं ध्वननमात्रम् अभिव्यक्तिमात्रं भवति । न च तस्य प्राधान्याभावे गुणीभूतव्यङ्ग्यत्वमपि सम्भाव्यम् । भिन्नसामाग्रीव्यक्तत्वाभावात् । अतश्च भावाभिव्यक्तिसामग्र्यां न व्यभिचार्यन्तरस्य नैयत्यम् ।

**स्वावलोकनप्रश्नाः**

१. भावध्वनौ व्यभिचार्यन्तरं कुतो नापेक्ष्यते ?

२. अङ्गतया भावस्य अभिव्यक्तावपि कुत्र न ध्वनित्वम् ?

३. भिन्नसामग्रीव्यक्तित्वं नाम किम् ?

# VIII. 4. भावसंख्या

पण्डितराजः भावाभिव्यञ्जकसामाग्रीनिरूपणानन्तरं चतुस्त्रिंशद्भावान् न्यरूरुपत् । तत्र हर्षादयः निर्वेदान्ताः त्रयस्त्रिंशत् व्यभिचारिणः, गुरु-देव-नृप-पुत्रादिविषया रतिश्चेति चतुस्त्रिंशत् भावाः । अत्र हर्षभावेन आरभ्य रतिभावेन भावसंख्यासमापनं पण्डितराजभावसंख्यायामेकः परिगणनीयो विषयः ।

**रतिर्देवादिविषया व्यभिचारी तथाञ्चितः भावः**

इति कारिकां निर्मितवता मम्मटाचार्येणापि व्यभिचारिभावाः त्रयस्त्रिंशद्, देवादिविषया रतिश्चेति, चतुस्त्रिंशद्भावाः भावपदेन व्यपदिष्टाः ।

एवं **भावानां चतुस्त्रिंशत्त्वे का युक्तिः ?** इति चेत् भरतवचनानां रसभावादिसंख्याविषये प्रमाणतया स्वीकृतिरेव । अन्यथा पुत्रविषयरतिरूपवात्सल्यस्य, देवादिविषयरतिरूपभक्तेश्च स्थायित्वेन रसत्वमेव प्रसज्येत। अतः व्यभिचारिभावानां त्रयस्त्रिंशत्त्वस्य भरतसम्मतत्वात् भक्तिवात्सल्यादीनाञ्च भरतमतानुसारेण रसपदार्थाप्रविष्टत्वात्, तेषामपि न्यायसम्पादनाय द्वयोरपि पारिभाषिकं भावशब्दवाच्यत्वं स्वीकृतम्। **उच्छृङ्खलतायाश्च मुनिवचननियंत्रितत्वेन अयोगात्।**

अत एव पण्डितराजः मात्सर्य-उद्वेग-दम्भ-ईर्ष्या-विवेक-निर्णय-वैक्लब्य-क्षमा-कुतुक-उत्कण्ठा-विनय-संशय-धाष्टर्यानां तत्र तत्र लक्ष्येषु सम्भवतामपि मुनिवचननियन्त्रितत्वात्, भाव-सङ्ख्यामध्ये न तान् पर्यजीगणत्। मुनिवचनानामुपादानस्य सम्भवे उच्छृङ्खलतायाः अयोगात् ।

पण्डितराजेन परिगणिताः भावाश्च इमे—

**हर्ष-स्मृति-व्रीडा-मोह-धृति-शङ्का-ग्लानि-दैन्य-चिन्ता-मद-श्रम-गर्व-निद्रा-मति-व्याधि-त्रास-सुप्त-विबोध-अमर्ष-अवहित्थ-उग्रता-उन्माद-मरण-वितर्क-विषाद-औत्सुक्य-आवेग-जडता-आलस्य-असूया-अपस्मार-चपलताः ।** प्रतिपक्षकृतधिक्कारादिजन्मा निर्वेदश्चेति त्रयस्त्रिंशद् व्यभिचारिणः । गुरुदेवनृपपुत्रादिविषया **रतिः** चेति चतुस्त्रिंशत् ।

**स्वावलोकनप्रश्नाः**

१. भावानां चतुस्त्रिंशत्वे किं मानम् ?

२. भक्तेरेव भावत्वाङ्गीकारे को विशेषः ?

३. मात्सर्यादीनां भावत्वानङ्गीकारे किं मानम् ?

# VIII. 5. भावलक्षणानि कतिपयभावनां लक्षणोदाहरणे च

एतेषां च भावानां पण्डितराजेन लक्षणानि उदाहणानि च निरूपितानि । तेषु कांश्चित् भावान् सोदाहरणं जानीमः । सर्वेषामेव भावानां पण्डितराजेन लक्षणप्रतिपादने अत्यन्तश्रद्धा समादृता । सङ्गीतरत्नाकराद्यालङ्कारिकशास्त्रग्रन्थान् आकलय्य चित्तवृत्तिपरतया भावस्य लक्षणप्रतिपादनम् एकः परिगणनीयो विषयः । तत्र मरणात्मकभावनिरूपणे **न चात्र ...मुख्यं मरणम् उचितं ग्रहीतुम् चित्तवृत्त्यात्मकभावेषु तस्याप्रसक्तेः** इति, एवम् **बलस्यापचयो ग्लानिः** इत्यत्र बलनाशजन्यं दुःखमेव बालापचयशब्देन विवक्षितम् इति च कथयता पण्डितराजेनापि मरणग्लान्योश्चित्तवृत्तिपरतयैव लक्षणं स्पष्टीकृतम् ।

अत एव पण्डितराजः व्रीडा-मोह-धृति-शङ्का-दैन्य-चिन्ता-मद-त्रास-अमर्ष-उग्रता-विबोध-जडता-असूया-चपलता-निर्वेदानां लक्षणेषु साक्षात् चित्तवृत्तिपदमेव उपयुक्तवान्, अन्यानि च लक्षणानि चित्तवृत्तिरूपार्थ स्फूर्तिजनकतया निर्मितवान् ।

एवं विशिष्टतया पण्डितराजेन व्याख्यातेषु भावेषु केषाञ्चिद्भावानां लक्षणानीदानीं जानीमः । तत्र चादौ प्रथमतः सर्वेषां भावानां पण्डितराजोक्तानि लक्षणानि दीयन्ते ।

**स्वावलोकनप्रश्नाः**

१. मरणस्य भावत्वानङ्गीकारे को हेतुः ?

२. मरणस्य किं लक्षणम् ?

३. ग्लानेः कथं भावत्वम् ?

## VIII. 5. i. भावलक्षणानि

**१. हर्षः—** इष्टप्राप्त्यादिजन्मा सुखविशेषो हर्षः ।

**२. स्मृतिः—** संस्कारजन्यं ज्ञानं स्मृतिः।

**३. व्रीडा—** स्त्रीणां पुरुषमुखावलोकनादेः पुंसाञ्च प्रतिज्ञाभङ्गपराभवादेः उत्पन्नः वैवर्ण्याधोमुखत्वादिकारणीभूतः चित्तवृत्तिविशेषः व्रीडा ।

**४. मोहः—** भयावेगादिप्रयोज्या वस्तुतत्त्वानवधारिणी चित्तवृत्तिर्मोहः।

**५. धृतिः—** लोभशोकभयादिजनितोपप्लवनिवारणकारणीभूतः चित्तवृत्तिविशेषः धृतिः।

**६. शङ्का—** किमनिष्टं मम भविष्यतीत्याकारकः चित्तवृत्तिविशेषः शङ्का ।

**७. ग्लानिः—** आधिव्याधिजन्यबलहानिप्रभवः वैवर्ण्यशिथिलाङ्गत्वदृग्भ्रमणादिहेतुः दुःखविशेषः ग्लानिः ।

**८. दैन्यम्—** दुःखदारिद्र्यापराधादिजनितः स्वापकर्षभाषणादिहेतुः चित्तवृत्तिविशेषो दैन्यम् ।

**९. चिन्ता—** इष्टाप्राप्त्यनिष्टप्राप्त्यादिजनिता ध्यानापरपर्याया वैवर्ण्यभूलेखनाधोमुखत्वादि-हेतुः चित्तवृत्तिविशेषः चिन्ता ।

**१०. मदः—** मद्याद्युपयोगजन्मा उल्लासाख्यः शयनहसितादिहेतुः चित्तवृत्तिविशेषः मदः ।

**११. श्रमः—** बहुतरशारीरव्यापारजन्मा निःश्वासाङ्गसम्मर्दनिद्रादिकारणीभूतः खेदविशेषः क्षमः।

**१२. गर्वः—** रूपधनविद्यादिप्रयुक्तात्मोत्कर्षज्ञानाधीनपरावहेलनं गर्वः ।

**१३. निद्रा—** श्रमादिप्रयोज्यं चेतस्सम्मीलनं निद्रा ।

**१४. मतिः—** शास्त्रादिविचारजन्यमर्थनिर्धारणं मतिः ।

**१५. व्याधिः—**रोगविरहादिप्रभवः मनस्तापो व्याधिः ।

**१६. त्रासः—** भीरोः घोरसत्त्वदर्शनस्फूर्जश्रवणादिजन्मा चित्तवृत्तिविशेषः त्रासः।

**१७. सुप्तम्—** निद्राविभावोत्थज्ञानं सुप्तम्।

**१८. विबोधः—**निद्रानाशोत्तरं जायमानो बोधः विबोधः।

**१९. अमर्षः—** परकृतावज्ञादिनानापराधजन्यो मौनवाक्पारुष्यादिकारणीभूतः चित्तवृत्तिविशेषः अमर्षः ।

**२०. अवहित्थम्—** व्रीडादिभिः निमित्तैः हर्षाद्यनुभावानां गोपनाय जनितो भावविशेषः अवहित्थम् ।

**२१. उग्रता—** अधिक्षेपापमानादिप्रभवा किमस्य करोमीत्याद्याकारा चित्तवृत्तिः उग्रता ।

**२२. उन्मादः—** विप्रलम्भ-महापत्ति-परमानन्दादिजन्माऽन्यस्मिन्नन्यावभासः उन्मादः ।

**२३. मरणम्—** रोगादिजन्या मूर्च्छारूपा मरणप्रागवस्था मरणम् ।

**२४. वितर्कः—** सन्देहाद्यनन्तरं जायमान ऊहः वितर्कः ।

**२५. विषादः—** इष्टासिद्धिराजगुर्वाद्यपराधादिजन्योऽनुतापो विषादः ।

**२६. औत्सुक्यम्—** अधुनैवास्य लाभो ममास्त्विवतीच्छा औत्सुक्यम् ।

**२७. आवेगः—** अनर्थातिशयजनिता चित्तस्य सम्भ्रमाख्या वृत्तिः आवेगः ।

**२८. जडताः—** चिन्तोत्कण्ठाभयविरहेष्टानिष्टदर्शनश्रवणादिजन्या अवश्य-कर्तव्यार्थप्रतिसन्धानविकला चित्तवृत्तिः जडता ।

**२९. आलस्यम्—** अतितृप्ति-गर्भ-व्याधि-श्रमादिजन्या चेतसः क्रियानुन्मुखता आलस्यम् ।

**३०. असूयाः—** परोत्कर्षदर्शनादिजन्यः परनिन्दादिकारणीभूतः चित्तवृत्तिविशेषः असूया ।

**३१. अपस्मारः—** वियोगशोकभयजुगुप्सादीनामतिशयाद्ग्रहावेशादेः चोत्पन्नो व्याधिविशेषः अपस्मारः ।

**३२. चपलता—** अमर्षादिजन्यवाक्पारुष्यादिकारणीभूता चित्तवृत्तिः चपलता ।

**३३. निर्वेदः—** नीचपुरुषेष्वाक्रोशनाधिक्षेप-व्याधि-ताडन-दारिद्र्य-इष्टविरह-परसम्पद्दर्शनादिभिः, उत्तमेषु त्ववज्ञादिभिः जनिता विषयद्वेषाख्या रोदन-दीर्घश्वास-दीनमुखतादिकारिणी चित्तवृत्तिः निर्वेदः ।

**३४. देवादिविषया रतिः** —चेति ।

**स्वावलोकनप्रश्नाः**

१. स्मृतेः लक्षणं किम् ?

२. निद्रायाः लक्षणं किम् ?

३. वितर्कस्य लक्षणं किम् ?

४. असूयायाः लक्षणं किम् ?

५. निर्वेदस्य लक्षणं किम् ?

इदानीं कतिपयभावानां सोदाहरणं लक्षणानि निरूप्यन्ते ।

## VIII. 5. ii. कतिपयभावानां सोदाहरणं लक्षणानि

**१. हर्षः**

**इष्टप्राप्त्यादिजन्मा सुखविशेषः हर्षः** इति हर्षभावस्य लक्षणम्। अयञ्च सुखविशेषत्वात् चित्तवृत्तिविशेषरूपः । अयं च हर्षः देव-पति-गुरु-स्वामिप्रसादेन, प्रियसङ्गमेन, मनोरथप्राप्ति-अप्राप्यमनोहर-धनागमैः, पुत्रादेः उत्पत्त्या च विभावेन जायते। नेत्रवक्त्रप्रसादः, प्रियोक्तिः पुलकोद्गमः अश्रुश्वेदादयश्च अनुभावाः इति प्राचीनकारिकाद्वारा पण्डितराजः हर्षसामग्रीं निरदिशत् । यथा-

**अवधौ दिवसावसानकाले भवनद्वारि विलोचने दधाना ।**
**अवलोक्य समागतं तथा मामथ रामा विकसन्मुखी बभूव ।।**

अत्र प्रियेण निर्दिष्टसमये दिवसावसानकाले भवनद्वारि दृष्टिपातकाल एव प्रियागमनात्मना भर्तृप्रसादेन नायिकायाः हर्षः व्यज्यते । विकसन्मुखत्वञ्च अत्रानुभावः ।

**स्वावलोकनप्रश्नाः**

१. हर्षस्य लक्षणं किम् ?

२. उदाहरणे विभावादयः प्रदर्शनीयाः ?

३. हर्षभावे जगन्नाथेन के के विभावादयः प्रदर्शिताः ?

**२. स्मृतिः**

**संस्कारजन्यं ज्ञानं स्मृतिः** इति स्मृतिभावस्य लक्षणम्। प्रथमम् अनुभवः, ततः अनुभावात् हृदये विलक्षणमुद्राख्यः कश्चित् संस्कारः, ततः स्मृतिः इति स्मृतिप्रक्रिया दर्शनेषु प्रसिद्धा। अतः संस्कारेण जायमानं ज्ञानमेव स्मृतिः । यथा–

**तन्मञ्जुमन्दहसितं श्वसितानि तानि**
**सा वै कलङ्कविधुरा मधुराननश्रीः ।**
**अद्यापि मे हृदयमुन्मदयन्ति हन्त**
**सायतनाम्बुजसहोदरलोचनायाः ।। पृ .९५.**

अत्र **तन्मञ्जु मन्दहसितम्, तानि श्वसितानि, सा मधुराननश्रीः** इति नायकसम्बन्धि-मन्दहसित-श्वसित-आननशोभाभावना अथवा तद्रूपा चिन्ता अत्र विभावः । भ्रून्नतिगात्रनिश्चलत्वादय आक्षेपगम्याश्चात्र अनुभावाः। तैश्च नायिकाविषयिणी नायकनिष्ठा स्मृतिः अभिव्यज्यते । यद्यप्यत्र नायिकारूपस्य आलम्बनविभावस्य, हन्तपदगम्यस्य हृदयवैकल्यरूपानुभावस्य संयोगात् विप्रलम्भरसाभिव्यक्तेः अत्र विप्रलम्भध्वनिरेव इति वक्तुं युक्तम्, तथापि **तन्मन्दहसितम्, तानि श्वसितानि, सा आननश्रीः** इति चिन्तोपस्थाप्यायां स्मृतावेव कवितात्पर्यस्य पुरस्फूर्तिकत्वात् स्मृत्याख्यभावध्वनित्वम् ।

ननु तच्छब्दस्य बुद्धिस्थपरामर्शकत्वात्, स्मृतेश्च बुद्धिरूपायाः तच्छब्दाभिहितत्वात् कथमत्र स्मृतिध्वनिः ? इति चेत् उच्यते– तच्छब्दस्य प्रकरणवशात् घटपटादिनानार्थबोधकत्वस्य दर्शनात्, तस्य हर्यादिपदवत् नानार्थत्वापत्तिवारणाय बुद्धिविषयतावच्छेदकत्वोपलक्षिततत्तद्धर्मावच्छिन्ने शक्तिः स्वीक्रियते । न च घटत्वपटत्वादिशक्यतावच्छेदकानां नानात्वात् पुनः तच्छब्दस्य

नानार्थकत्वमिति वाच्यम्, तेषां धर्माणां नानाभूतानामपि बुद्धिविषयतावच्छेदकत्वरूपोपलक्षणधर्मेण एकेन अनुगमितानां नानात्वाभावात् न तच्छब्दस्य नानाशक्तिमत्पदत्वलक्षणनानार्थकत्वम् ।

एवं चास्मिन् मते तच्छब्दस्य नानाधर्मावच्छिन्ने शक्तेः अभावात्, न तच्छब्दस्य नानार्थकत्वम्। बुद्धिविषयतावच्छेदकस्यापि उपलक्षणविधयैव भानात् प्रकारविधया अभानाच्च बुद्धेः न तत्पदवाच्यत्वम् ।

**बुद्धिस्थप्रकारावच्छिन्ने तत्पदस्य शक्तिः** इति द्वितीयमते तु घटत्वपटत्वादीनां बुद्धिस्थ-प्रकारकत्वेन अनुगतीकृतानां नानात्वाभावात्, न तच्छब्दस्य नानार्थकत्वम् । बुद्धेः तत्पदशक्य-कोटिप्रवेशे बुद्धित्वेन बुद्धेः अत्र वाच्यत्वेऽपि, स्मृतित्वेन स्मृतेः अवाच्यत्वात् स्मृतेः ध्वनित्वं युक्तमेव ।

**स्वावलोकनप्रश्नाः**

१. स्मृतेः लक्षणं किम् ?

२. तच्छब्दस्य नानार्थकत्वं कथं वार्यते ?

३. बुद्धेः तत्छब्दवाच्यत्वं कुतो न भवति ?

४. बुद्धिस्थप्रकारावच्छिन्ने तत्पदस्य शक्तिः इति ।

### ३. व्रीडा

स्त्रीणां पुरुषमुखावलोकनादेः, पुंसां च प्रतिज्ञाभङ्गपराभवादेः उत्पन्नः वैवर्ण्याधोमुखत्वादि-कारणीभूतः चित्तवृत्तिविशेषः **व्रीडा** । यथा—

**कुचकलशयुगान्तर्मामकीनं नखाङ्कं**
**सपुलकतनुमन्दं मन्दमालोकमाना ।**
**विनहितवदनं मां वीक्ष्य बाला गवाक्षे**
**चकितनतनताङ्गी सद्म सद्यो विवेश ।।**

अत्र न केवलं प्रियस्य दर्शनं विभावः, अपि तु नायककृतस्तनान्तर्वर्तिनखक्षतं पश्यन्त्याः नायिकायाः अवलोकनेन प्रियस्य हर्षपुलकादौ जाते, पुनः तदीयहर्षपुलकादीनां गवाक्षद्वारा नायिकाकृतं वीक्षणमपि विभावः । सद्यस्सदनप्रवेशः अनुभावः । एवं विभावानुभावाभ्यामत्र व्रीडा व्यज्यते। यथा वा—

**निरुध्य यान्तीं तरसा कपोतीं कूजत्कपोतस्य पुरो ददाने ।**
**मयि स्मितार्द्रं वदनारविन्दं सा मन्दमन्दं नमयाम्बभूव ।।**

अत्र कोपात् त्रासाद्वा अन्यत्र यान्तीं कपोतीं निरुध्य रिरंसया कलकलं कुर्वतः कपोतस्य पुरतः अवस्थापयति नायके नायिकायाः दृष्टिनमनस्य वर्णनात्, प्रथमतः नायकस्य प्रणयिषु भावार्द्रदृष्टेः सन्तोषस्य, **मयि स्मितार्द्रं वदनारविन्दम्** इत्यनेन अभिव्यक्तावपि, क्रमेण नायकस्य नायिकायाः विषये गाढसमागमवाञ्छायाः नायिकया ग्रहणात्, तेन च दृष्टिपातस्य नमनात् अत्र व्रीडाख्यः भावः व्यज्यते ।

**स्वावलोकनप्रश्नाः**

१. व्रीडायाः लक्षणं किम् ?

२. उदाहरणे विभावादीन् पृथक् दर्शयत ?

**४. मोहः**

भयवियोगादिप्रयोज्या वस्तुतत्त्वानवधारिणी चित्तवृत्तिः **मोहः** । अयं च मोहः वस्तुतत्वानवधारणात्मकावस्थारूपया चिन्तया शबलितः इति नवीनाः आशेरते । यथा—

**विरहेण विकलहृदया विलपन्ती दयित दयितेति ।**
**आगतमपि तं सविधे परिचयहीनेव वीक्षते बाला ।।**

अत्र कान्तावियोगः विभावः । तेन **सविधे आगतमपि प्रियं परिचयहीनेव वीक्षते** इति इन्द्रियवैकल्यस्य अनुभूयमानत्वात्, तेन च वस्तुतत्त्वानवधारणात्मकः मोहो व्यज्यते।

**स्वावलोकनप्रश्नाः**

१. मोहस्य लक्षणं किम् ?

२. उदाहरणे विभावादयः के ?

**५. ग्लानिः**

आधिव्याधिजन्यबलहानिप्रभवो वैवर्ण्यशिथिलाङ्गत्वदृग्भ्रमणादिहेतुः दुःखविशेषो **ग्लानिः** । यथा—

**शयिता शैवलशयने सुषमाशेषा नवेन्दुलेखेव ।**
**प्रियमागतमपि सविधे सत्करुते मधुरवीक्षणैरेव ।।**

अत्र प्रियविरहः विभावः । **मधुरवीक्षणैरेव सत्कुरुते** इत्यत्र एवकारेण बोध्यमानः प्रत्युद्गमन-चरणनिपतन-आश्लेषादीनामभावः अत्रानुभावः। तेन शिथिलाङ्गत्वहेतुः दुःखविशेषः अत्र ग्लानिरूपेण ध्वन्यते। न चात्र श्रमभावश्शङ्क्यः श्रमोपयोगिनः बलस्यात्राभावात् ।

केचित् **व्याधिप्रभवबलनाश एव ग्लानिः** इत्याहुः । परं चित्तवृत्त्यात्मकभावेषु नाशरूपायाः ग्लानेः समावेशायोगात् बलनाशः ग्लानिः इति वक्तुं न शक्यते। यद्यपि **बलस्यापचयो ग्लानिः आधिव्याधिसमुद्भवः** इति बलहानेरेव प्राचीनैः ग्लानित्वमुक्तम्, तथापि लक्षणवाक्ये अपचयशब्देन न नाशो विवक्ष्यते, अपि तु नाशानुकूलचित्तवृत्तिः बलापय च शब्देन विवक्षिता ।

**स्वावलोकनप्रश्नाः**

१. व्याधिप्रभवबलनाश एव ग्लानिः इति प्राचीनलक्षणे का अनुपपत्तिः ?

२. ग्लानेः निष्कृष्टं लक्षणं किम् ?

३. उदाहरणे विभावादयः के ?

### ६. दैन्यम्

दुःखदारिद्र्यापराधादिजनितः स्वापकर्षभाषणादिहेतुः चित्तवृत्तिविशेषः **दैन्यम्** । यथा–

**हतकेन मया वनान्तरे वनजाक्षी सहसा विवासिता ।**
**अधुना मम कुत्र सा सती पतितस्येव परा सरस्वती ।।**

एषा च सीतां परित्यक्तवतः रामचन्द्रस्योक्तिः । अत्र च सीतापरत्यागरूपापराधजन्यं दुःखं विभावः । पतितसाम्यं स्वापकर्षणभाषणं चानुभावः । अत्र **पतितस्येव परा सरस्वती** इति सीतायाः औपम्यकथनम् आत्मनि (रामचन्द्रे) पापं प्रकाशयन्ती दैन्यमभिव्यञ्जयति । शूद्रस्य परा सरस्वती चेत् सा तस्य जन्मतः असिद्धेति, तद्वत् सीतायाः भ्रंशः नोपपद्येत । पतितब्राह्मणस्य परा सरस्वती इव सीता इति औपम्यकथनादेव रामे पापं व्यज्यते ।

यथा कश्चित् जात्या ब्राह्मणः वेदाध्ययनाधिकारवानपि आत्मनः दुश्शीलत्वादिना पराविद्यां प्रभ्रंशितवान्, एवं **पापाचरणशीलत्वेन साध्वीमपि सीताम् अहं प्रभ्रंशितवान्** इति आत्मनः पापाविष्करणस्य पतितपरा सरस्वत्यौपम्यैकसाध्यत्वात् स्वापकर्षणभाषणादिचित्तवृत्तिलक्षणदैन्यस्य उपमालङ्कृत्या अलङ्कारः । एवम् **मया, सा** इति अर्थान्तरसंक्रमितलक्षणामूलध्वनिभ्यां रामे कृतघ्नत्वम्, सीतायां कृतज्ञत्वम्, रामे निर्दयत्वम्, सीतायां दयावतीत्वं च व्यज्यते । तदपि दैन्यं परिपोषयति ।

**स्वावलोकनप्रश्नाः**

१. दैन्यस्य लक्षणं किम् ?

२. अत्र अलङ्कारः कः ?

३. अर्थान्तरसङ्क्रमितध्वनी कौ ?

**७. मदः**

मद्याद्युपयोगजन्मा उल्लासाख्यः शयनहसितादिहेतुः चित्तवृत्तिविशेषः **मदः** । **सम्मोहनानन्दसन्देहो मदो मद्योपयोगजः** इति कथयद्भिः प्राचीनैरपि अयमेव भावः आविष्कृतः । अयञ्च मदः उत्तमे पुरुषे स्वापानुभावितः, मध्यमे पुरुषे हसितगानप्रयोजकः, नीचे तु रोदनवाक्पारुष्यादिप्रयोजकः ।

अयञ्च मदः तरुण-मध्यम-अधमभेदात् त्रिविधः । तत्र अव्यक्तासङ्गतवाक्यैः सुकुमारस्खलद्गत्या च यः अभिनीयते सः तरुणो मदः । भुजाक्षेपस्खलितघूर्णितादिभिः व्यक्तस्तु मदः मध्यमः । गतिभङ्ग-स्मृति-नाश-हिक्का-च्छर्द्या(उवमना)दिभिः व्यक्तस्तु अधमः । यथा–

**मधुरतरं स्मयमानः स्वस्मिन्नेवालपञ्शनैः किमपि ।**
**कोकनदयंस्त्रिलोकीमालम्बनशून्यमीक्षते क्षीबः ।।**

अत्र मादकद्रव्यसेवनं विभावः । अव्यक्तालापः अनुभावः । तेन उल्लासाख्यः मदः व्यज्यते । **मधुरमि**त्यादिपद्ये क्षीबस्य= मत्तस्य स्वभाववर्णनेन यद्यपि स्वभावोक्त्यलङ्कारः, तथापि तस्य ध्वन्यमानमदोपस्कारकत्वात् नास्ति प्राधान्यम् । एवम्–

**मधुरसान्मधुरं हि तवाधरं तरुणि मद्वदने विनिवेशय ।**
**मम गृहाण करेण कराम्बुजं पपपतामि हहा भभभूतले ।।**

अत्रापि मादकद्रव्यसेवनमेव विभावः पपपतामि भभभूतले इत्याद्यधिकवर्णोच्चारणम् उत्तरार्धे तरुणीकरस्य अम्बुजोपमेयत्वे प्रतिपादनीये, मम कराम्बुजम्, इति मत्तस्य प्रतिपादनञ्च मदमेव पोषयति ।

**स्वावलोकनप्रश्नाः**

१. **मधुरतरम्** इत्यत्र विभावादयः के ?

२. **मधुरसान्मधुरम्** इत्युदाहरणे विभावादयः के ?

**८. श्रमः**

बहुतरशारीरव्यापारजन्मा निःश्वासाङ्गसम्मर्दनिद्रादिकारणीभूतः खेदविशेषः **श्रमः** । अयं च श्रमः अध्वव्यायामसेवाद्यैः विभावैः गात्रसंवाहनरहस्यसङ्कोचावयवमोटना(उनमना)दिभिः निःश्वास-जृम्भित-पादोत्क्षेपैः श्रमः प्रयोज्यते । यथा–

**विधाय सा मद्वदनानुकूलं कपोलमूलं हृदये शयाना ।**
**चिराय चित्रे लिखितेव तन्वी न स्पन्दितुं मन्दमपि क्षमासीत् ।।**

अत्र विपरीतसुरतश्रान्तायाः कस्याश्चित् नायिकायाः अवस्थावर्णनात्मके पद्येऽस्मिन् कपोलमूलं नायकस्य हृदये विधाय शयनात्मकेन अनुभावेन व्यक्तस्य विपरीतसुरतरूपशारीरव्यापारस्य श्रमव्यञ्जकत्वात् अत्र श्रमः । न चायं श्रमः निद्राभावध्वननेन गतार्थ इति शङ्क्यम् । सुषुप्ति-रूपायां निद्रायां ज्ञानराहित्यस्यैव अनुभूयमानत्वात् । अत्र च **न स्पन्दितुं मन्दमपि क्षमासीत्** इत्यनेन केवलं यत्नराहित्यस्यैव प्रतिपादनात्, ज्ञानराहित्यस्य अप्रतिपादनात् नात्र निद्रालेशशङ्काऽपि ।

**स्वावलोकनप्रश्नाः**

१. निद्रा-श्रमयोः भेदं स्पष्टयत ।

२. निद्राभावस्य लक्षणं किम् ?

३. श्रमस्य लक्षणं किम् ?

**९. गर्वः**

रूपधनविद्यादिप्रयुक्तात्मोत्कर्षज्ञानाधीनपरावहेलनं गर्वः । यथा—

**आमूलाद्रत्नसानोर्मलयवलयितादा च कूलात्पयोधे**
**र्यावन्तः सन्ति काव्यप्रणयनपटवस्ते विशङ्कं वदन्तु।**
**मृद्वीकामध्यनिर्यन्मसृणरसझरीमाधुरीभाग्यभाजां**
**वाचामाचार्यतायाः पदमनुभवितुं कोऽस्ति धन्यो मदन्यः ।। पृ १०४.**

अत्र स्वकीयकवितायाः अनन्यसाधारणताज्ञानं विभावः । पराधिक्षेपपरैतादृशवाक्यप्रयोगः अनुभावः । असूयाऽप्यत्र लेशतो विद्यमाना लेशतः पराधिक्षेपेण प्रतीयमानं गर्वं पुष्णाति । प्राक् वीररसप्रसङ्गे **अपि वक्ति गिरां पतिः** इत्याद्युदाहरणे **बृहस्पतिना गिरामधिदेवतया सरस्वत्या वा अहं वदिष्यामि** इत्यत्र अभिव्यक्तस्य उत्साहस्य परिपोष एव **सर्वेभ्यः पण्डितेभ्यः अहमधिकः**

**इति गर्वः, न तु प्रकृतपद्य इव कोऽस्ति धन्यो मदन्यः** इति गर्वभावस्य प्राधान्यमस्ति । अतश्च गर्वध्वनि वीररसध्वन्योः को भेदः ? इत्युक्ते— उत्साहप्रधानः गूढगर्वः वीररसध्वनिः । गर्वप्रधानः तु गर्वध्वनिः इति भेदः ।

**स्वावलोकनप्रश्नाः**

१. गर्वस्य लक्षणं किम् ?

२. उदाहरणे विभावादयः के ?

३. **अपि वक्ति गिरां पतिस्स्वयम्** इति स्थले वीररसः कथं भवति ? गर्वध्वनिः कुतो न भवति ?

**१०. विबोधः**

निद्रानाशोत्तरं जायमानः बोधो विबोधः। निद्रानाशश्च निद्रापूर्त्या स्वप्नान्तेन बलवच्छब्दस्पर्शेन च अभिव्यज्यत इति त एवात्र विभावाः । अक्षिमर्दनगात्रमर्दनादयश्च अनुभावाः । यथा—

**नितरां हितयाद्य निद्रया मे बत यामे चरमे निवेदितायाः ।**
**सुदृशो वचनं शृणोमि यावन्मयि तावत्प्रचुकोप वारिवाहः ।।**

अत्र गर्जितश्रवणं विभावः । प्रियवचनश्रवणोल्लासनाशः गम्यः अत्रानुभावः एवं विभावानुभावाभ्यां वारिवाहप्रकोपवर्णनेन विबोधस्य अभिव्यक्तेः विबोधः । केचित् अविद्याध्वंसजन्यं विबोधमप्युदाहरन्ति । तेषां मते तु—

**नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत ।**
**स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ।।**

इति गीतापद्यमेव विबोधस्य उदाहरणम् । न चात्र वारिवाहविषयायाः असूयायाः एव वाक्यार्थता इति शङ्कनीयम्, प्रथमतः विबोधप्रतीतौ सत्यां तस्यामनौचित्यागमे सति अनुचितविबोधजनकत्वेन

वारिवाहे असूयायाः विलम्बेन प्रतीतेः, असूयायाः विबोधमुखनिरीक्षकत्वात् पुरस्फूर्तिकस्य विबोधस्यैव अत्र प्राधान्यम् उचितम् । यदि असूया कवितात्पर्यविषयीभूता, तर्हि निर्दयत्वादिबोधकं किमपि वारिवाहविशेषणमुपात्तं स्यात् । तथा अनुपादानाच्च न असूयाप्रतीतिः । नापि स्वप्नध्वनिः, वारिवाहनादेन तन्नाशस्यैव प्रतिपत्तेः। अथवा अत्र स्वप्नभावप्रशमनेन असूयया च सह विबोधस्य सङ्करः ।

**स्वावलोकनप्रश्नाः**

१. विबोधस्य लक्षणं किम् ?

२. उदाहरणे विभावादयः के ?

३. अविद्या ध्वंसजन्यस्य विबोधस्य उदाहरणं किम् ?

४. **नितरां हितयाद्य** इत्यादिश्लोके असूयाभावः कुतो न भवति ?

**११. अमर्षः**

परकृतावज्ञादिनानापराधजन्यः मौनवाक्पारुष्यादिकारणीभूतः चित्तवृत्तिविशेषः अमर्षः । यथा—

**वक्षोजाग्रं पाणिनाऽमृश्य दूरे यातस्य द्रागाननाब्जं प्रियस्य ।**
**शोणाग्राभ्यां भामिनी लोचनाभ्यां जोषं जोषं जोषमेवावतस्थे ।।**

अत्र आकस्मिकप्रियास्तनाग्रस्पर्शः विभावः। प्रियानयनारुण्यनिर्निमेषनिरीक्षणे अनुभावौ। ताभ्याञ्च जोषमवस्थानप्रयोजिका चित्तवृत्तिः व्यज्यत इति अमर्षः ।

**स्वावलोकनप्रश्नाः**

१. अमर्षलक्षणं किम् ?

२. उदाहरणे विभावादयः के ?

**१२. उग्रता**

अधिक्षेपावमानादिप्रभवा किमस्य करोमीत्याद्याकारा चित्तवृत्तिः उग्रता । नृपापराधः, असद्दोषकीर्तनम्, चोरधारणम्– इत्यादयः **विभावाः** । बन्धः, वधः, ताडनम्, भर्त्सनम् — इत्यादयश्**चानुभावाः** । यथा—

**अवाप्य भङ्गं खलु सङ्गराङ्गणे नितान्तमङ्गाधिपतेरमङ्गलम् ।**
**परप्रभावं मम गाण्डिवं धनुर्विनिन्दतस्ते हृदयं न कम्पते ।।**

एषा कर्णेन पराभूतं गाण्डीवं निन्दन्तं युधिष्ठिरं प्रति धनञ्जयस्योक्तिः। अत्र अर्जुनगत-प्रतीकारात्मकचित्तवृत्तौ युधिष्ठिरकर्तृका गाण्डीवनिन्दा विभावः । वधेच्छानुभावः ।न च अमर्षोग्रतयोः अधिक्षेपावमानादिजन्यत्वेन नास्ति तयोर्भेद इति वाच्यम् । **शोणाग्राभ्यां भामिनी लोचनाभ्याम्** इति अमर्षभावध्वनौ उग्रतायाः अप्रतीतेः। न चासौ क्रोधः इति वाच्यम्, उग्रताया सञ्चारिणीत्वेन क्रोधस्य च स्थायित्वेन भेदात् ।

**स्वावलोकनप्रश्नाः**

१. अमर्षोग्रतयोः को भेदः ?

२. उदाहरणे विभावादयः के ?

### १३. मरणम्

रोगादिजन्या मूर्च्छारूपा मरणप्रागवस्था मरणम् । न च भावानां प्रसङ्गे प्राणवियोगात्मकं मरणं ग्रहीतुमुचिमिति, चित्तवृत्त्यात्मकेषु भावेषु तस्य अप्रसक्तेः मरणप्रागवस्था एव मरणम् । अन्यच्च सर्वेषु भावेषु उत्पादनीयेषु कार्यसहकारितया शरीरप्राणसंयोगस्य हेतुत्वात् भावस्य मरणस्य प्राणवियोगात्मकत्वं न युज्यते। यथा—

**दयितस्य गुणाननुस्मरन्ती शयने सम्प्रति या विलोकितासीत् ।**
**अधुना खलु हन्त सा कृशीङ्गी गिरमङ्गीकुरुते न भाषितापि ।।**

अत्र च प्रियविरहः विभावः । वचनविरामः अनुभावः । तेन च नायिकायाः मरणप्रागवस्थारूपं मरणं व्यज्यते । अत्र च पद्ये सर्वस्यापि वाक्यस्य मरणव्यञ्जकत्वेऽपि **हन्त** इति पदेन कुर्वद्रूपतया मरणप्रागवस्थायाः अभिव्यञ्जनात् अत्र मरणं पदव्यङ्ग्यम् । अस्यच श्लोकार्धस्य अनन्तरश्लोकार्धेन विप्रलम्भस्फोरकेण यदा परिसमाप्तिः, तदा मरणं विप्रलम्भस्य अङ्गम् । अन्यथा तु करुणेन समाप्तौ करुणस्य अङ्गम् इति बोध्यम्।

**स्वावलोकनप्रश्नाः**

१. चित्तवृत्त्यात्मकतया मरणस्य कथम् ?

२. उदाहरणे विभावायः के ?

### १४. विषादः

इष्टासिद्धिराजगुर्वाद्यपराधादिजन्यः अनुतापो विषादः । यथा—

**भास्करसूनावस्तं याते जाते च पाण्डवोत्कर्षे ।**
**दुर्योधनस्य जीवित ! कथमिव नाद्यापि निर्यासि ।।**

अत्र स्वापकर्षपरोत्कर्षयोः दर्शनं विभावः । जीवितनिर्याणाशंसा अनुभावः । तेन च दुर्योधनस्य इष्टासिद्धिजनितः अनुतापलक्षणः विषादः व्यज्यते । न चात्र त्रासभावध्वनित्वं युक्तम्,

परवीरस्य दुर्योधनस्य त्रासलेशस्य अपि अयोगात् । नाप्यत्र दुर्योधनस्य चिन्ता व्यज्यते। **युद्ध्वा मरिष्यामि** इति तस्य निश्चयस्यैव दर्शनात् । नापि दैन्यध्वनित्वम्, सकलसैन्यक्षयेऽपि विपदस्तेना-गणनात् । नापि वीररसध्वनित्वम्, मरणस्य तेन निश्चिततत्वात्, उत्साहस्य अभावात् ।

**स्वावलोकनप्रश्नाः**

१. निर्वेदलक्षणं विशदयत ।

२. उदाहरणे विभावादयः के ?

३. अत्र दैन्यध्वनित्वं कथं न सम्भवति ?

**१५. निर्वेदः**

नीचपुरुषेष्वाक्रोशन-अधिक्षेप-व्याधि-ताडन-दारिद्र्य-इष्टविरहपरसम्पद्दर्शनादिभिः, उत्तमेषु त्ववज्ञादिभिर्जनिता विषयद्वेषाख्या रोदन-दीर्घश्वास-दीनमुखतादिकारिणी चित्तवृत्तिः निर्वेदः। यथा-

**यदि लक्ष्मण सा मृगेक्षणा न मदीक्षासरणिं समेष्यति ।**
**अमुना जडजीवितेन मे जगता वा विफलेन किं फलम् ।।**

अत्र सीतया वियुक्तस्य रामस्य विफलेन जगता किं प्रयोजनम् इति विषयद्वेषाख्यचित्तवृत्तेः वर्णनात् निर्वेदः । अयञ्च अवज्ञादिभिः जनितः विषयविद्वेषः व्यभिचारिभावः। नित्यानित्यवस्तु विवेकजन्यस्तुनिर्वेदः शान्तरसत्वम् एष्यति ।

**स्वावलोकनप्रश्नाः**

१. निर्वेदः कुत्र व्यभिचारी ?

२. निर्वेदः कुत्र स्थायी ?

**१६. देवादिविषया रतिः**

यथा– **भवद्द्वारि क्रुध्यज्जयविजयदण्डाहतिदल-**
**त्किरीटास्ते कीटा इव विधिमहेन्द्रप्रभृतयः ।**
**वितिष्ठन्ते युष्मन्नयनपरिपातोत्कलिकया**
**वराकाः के तत्र क्षपितमुरनाकाधिपतयः ।। पृ. ११८.**

अत्र च भगवन्मुररिपुविषयकः रत्याख्यः भावः व्यज्यते। ननु कथमत्र देवादिविषयकरतेः ध्वनित्वम्? विधिमहेन्द्रप्रभृतिभिः अपमानसहनभगवद्द्वारनिषेवणादिभिः भगवदालम्बना ब्रह्मादिगता रतिः अत्र नाभिव्यज्यते। प्रत्युत भगवदैश्वर्यस्य च अवाङ्मानसगोचरत्वेन तादृशरतेः वर्णनमपि दुश्शकमेव इति चेत्, तथापि भगवदैश्वर्यवर्णनानुभाविताायाः कविगतभगवदालम्बनरतेः अत्र ध्वनित्वम् अक्षतमेव । इत्थं कतिपयभावाः सोदाहरणं निरूपिताः ।

**स्वावलोकनप्रश्नाः**

१. अत्र भगद्भक्तिरेव कथं व्यज्यते ?

२. एतावत्पर्यन्तम् अत्र ग्रन्थे (रसगङ्गाधरसङ्गमन्याम्) कति भावाः निरूपिताः ?

इदानीं कतिपयभावानां पारस्परिकः भेदः निरूप्यते ।

# VIII. 6. कतिपयभावानां पारस्परिको भेदः

पण्डितराजेन भावविचारे–

i. शङ्काचिन्तयोः ii. चिन्तौत्सुक्ययोः iii. ग्लानिश्रमयोः
iv. उग्रतामर्षयोः v. व्याध्युन्मादयोः vi. चिन्तावितर्कयोः
vii. मोहजडतयोः viii. ग्लान्यालस्यजडतानाम्
ix. श्रमालस्ययोः x. अपस्मारव्याध्योः xi. चपलतामर्षयोश्च

—प्रसङ्गवशात् पारस्पारिको भेदः रसगङ्गाधरे निरूपिताः ।

## VIII. 6. i. शङ्काचिन्तयोः

तत्र **किमनिष्टं मम भविष्यति** इत्याकारकः चित्तवृत्तिविशेषः शङ्का। इष्टाप्राप्ति-अनिष्टप्राप्त्यादि-जनितध्यानापरपर्याया वैवर्ण्य-भूलेखन-अधोमुखत्वादिहेतुः चित्तवृत्तिविशेषः चिन्ता। उभयत्रापि अनिष्टविषयका-लोचनाजनितचित्तवृत्तेः तुल्यत्वात्, अनयोर्द्वयोः चित्तवृत्त्योः को वा विशेषः ? इति सन्देहे शङ्का भयाद्युत्पादनेनैव कम्पादिकारिणी, चिन्ता तु तथा न ——इति शङ्काचिन्तयोः भेदः प्रकटितः ।

## VIII. 6. ii. चिन्तौत्सुक्ययोः

**अधरद्युतिरस्तपल्लवा मुखशोभा शशिकान्तिलङ्घिनी ।**
**अकृतप्रतिमा तनुः कृता विधिना कस्य कृते मृगीदृशः ।।**

इति चिन्तोदाहरणे इष्टाप्राप्तिकृतचिन्तात्मकचित्तवृत्तिविशेषवर्णनात्मके लोकोत्तरतया सृष्टायाः नायिकायाः विषये लाभविषयकेच्छात्मकस्य औत्सुक्यस्य प्रतीतेः, चिन्तायाः औत्सुक्यात् को भेदः ? इति चेत्– **इष्टाप्राप्तिजनिता ध्यानापरपर्याया चिन्ता, कस्यकृते विधिना कृता** इति वत् अनिर्दिष्टधर्म्यालम्बना । औत्सुक्यन्तु **अधुनैव अस्य लाभो ममास्तु** इति निर्दिष्टधर्म्यालम्बनः इच्छाविशेषः —इति तयोः भेदः ।

## VIII. 6. iii. ग्लानिश्रमयोः

आधिव्याधिजन्यबलहानिप्रभवः वैवर्ण्य-शिथिलाङ्गत्वदृग्भ्रमणादिहेतुः दुःखविशेषो ग्लानिः। बहुतरशरीरव्यापारजन्मा निःश्वासाङ्गसम्मर्दनिद्रादिकारणीभूतः खेदविशेषः श्रमः इति द्वयोर्लक्षणम्। उभयोरपि चित्तवृत्तिविशेषयोः दुःखात्मकत्वात् अनयोः को वा भेदः ? इत्युक्ते श्रमः सत्यपि बले जायते, ग्लानिस्तु बलहानौ सत्यामेव जायते। एवं ग्लानिः शरीरव्यापारं विनैव आधिव्याधिजन्यबलहान्या जायते। श्रमस्तु शरीरव्यापारादेव जायते ।

## VIII. 6. iv. उग्रतामर्षयोः

**अधिक्षेपापमानादिप्रभवा किमस्य करोमि** ——इत्याद्याकारचित्तवृत्तिः **उग्रता** । पराकृतावज्ञादिनानापराधजन्यः मौनवाक्पारुष्यादिकारणीभूतचित्तवृत्तिविशेषः **अमर्षः** —इति द्वयोर्लक्षणम् । उभयोरपि चित्तवृत्त्योः अवज्ञादिजन्यत्वेन अविशेषप्राप्ते अमर्षे केवलं मौनवाक्-पारुष्यादिकम् एवानुभूयते ।

यथा— प्रियेण पाणिना वक्षोजाग्रावमर्शे सति **शोणाग्राभ्यां भामिनी लोचनाभ्यां जोषं जोषं जोषमेवावतस्थे** इति पण्डितराजोक्तामर्षोदाहरणे मौनानुकूलचित्तवृत्तरेव दृश्यते । उग्रतायान्तु **किमस्य करोमि** इत्याद्याकारप्रतीकारतात्पर्यवती चित्तवृत्तिरुपलभ्यते ।

## VIII. 6. v. व्याध्युन्मादयोः

रोगविरहादिप्रभवो मनस्तापो **व्याधिः** । विप्रलम्भमहाविपत्तिपरमानन्दादिजन्मान्यस्मिन् अन्यावभासः **उन्मादः** इति द्वयोर्लक्षणम् । ननु उन्मादस्य व्याधिविशेषत्वे व्याधेः उन्मादस्य को भेदः इति चेत्– यद्यपि उन्मादः व्याधौ अन्तर्भवति, तथापि व्याध्यन्तरापेक्षया उन्मादरूपव्याधौ वैचित्र्यस्फोरणाय उन्मादस्य पृथगुपादानम्।

## VIII. 6. vi. चिन्तावितर्कयोः

चिन्तायाः विवर्कस्य च को भेदः । यतः इष्टाप्राप्ति-अनिष्टप्राप्त्यादिजनितध्यानापरपर्यायाधोमुखत्वादिहेतुः चित्तवृत्तिविशेषः **चिन्ता** । **वितर्कोऽपि** कश्चित् मानसिकः चित्तवृत्तिविशेषः । तर्हि कथमनयोर्भेदः इत्युक्ते सन्देहाद्यन्तरं जायमाना ऊहात्मकचित्तवृत्तिविशेषलक्षणः वितर्कः, नियमेन निश्चयं प्रति प्रयोजकः ।

चिन्ता तु केवलं वैवर्ण्यभूलेखनादिहेतुरेव भवति । न निश्चयपर्यन्तं गच्छति । किञ्च किं भविष्यति? कथं भविष्यति? इत्याद्याकारः चित्तवृत्तिविशेषः चिन्तायाः विषयः । वितर्कस्य तु इदमित्थं प्रायशो भविष्यति इति विषयः । एवं विषयतावैलक्षण्यादपि चिन्तावितर्कयोः भेदः ।

## VIII. 6. vii. मोहजडतयोः

भयवियोगादिप्रयोज्यवस्तुतत्वानवधारिणी चित्तवृत्तिः **मोहः** (पृ.९९) ।

चिन्तोत्कण्ठा-भय-विरह-इष्टानिष्टदर्शन-श्रवणादिजन्या अवश्यकर्तव्यार्थप्रतिसन्धानविकला चित्तवृत्ति**र्जडता** (पृ.११३.) —इति द्वयोर्लक्षणम्।

उभयत्रापि वस्तुतत्त्वानवधारणप्रतिसन्धानविकलत्वाभ्याम् ऐक्यस्य दर्शनात् को वा अन्योर्भेदः इत्युक्ते इयञ्च मोहात्पूर्वतः परतश्च जायते —इति पण्डितराजस्य समाधानम्। अवश्यकर्तव्यार्थ-प्रतिसन्धानवैकल्यलक्षणं जाड्यं वस्तुतत्वानवधारणात्मकं मोहात् पूर्वतः परतश्च जायते। एतदेव प्राचीनैरप्युक्तम्। **स पूर्वं परतो वा स्यात् मोहादिति विदां मतम्** ।

## VIII. 6. viii. ग्लानि-आलस्य-जडतानां भेदः

चेतसः क्रियानुन्मुखता **आलस्यम्** । कर्तव्यार्थप्रतिसन्धानवैकल्यं **जडता**। दृग्भ्रमणादिहेतुः दुःखविशेषः **ग्लानिः** । एवञ्च त्रिष्वपि भावेषु जाड्यस्य तत्तद्धर्मैः दर्शनात् को वा भेदः इति प्रश्ने इदं पण्डितराजस्य समाधानम् । अतितृप्तिगर्भव्याधिश्रमादिजन्यं चेतसः क्रियानुन्मुखताऽऽलस्यम् । अत्र च आलस्ये ग्लानौ इव असामर्थ्यं नास्ति । जडतायामिव कर्तव्यार्थप्रतिसन्धानवैकल्यं नास्ति –इति ताभ्यामस्य भेदः ।

## VIII. 6. ix. श्रमालस्ययोः भेदः

ननु निद्रादिकारणीभूतखेदविशेषात्मक**श्रमस्य**, श्रमादिजन्यस्य चेतसः क्रियानुन्मुखत्व-लक्षणा**लस्यस्य** को भेदः ? उभयत्रापि श्रमस्य सद्भावात् इति चेत्– श्रमजन्ये आलस्ये श्रमस्य पोषकतयावस्थानं न प्राधान्येन अतृप्त्यादिजनिते तु आलस्ये श्रमाद्विविक्तविषयत्वं प्रसिद्धमेव ।

## VIII. 6. x. अपस्मारव्याध्योः

रोगविरहादिप्रभवः मनस्तापो **व्याधिः** । वियोगशोकभयजुगुप्सादीनामतिशयात् ग्रहावेशादेश्च उत्पन्नो व्याधिविशेषः **अपस्मारः** । एवञ्च द्वयोरपि व्याधिरूपत्वात् अनयोः को भेदः इति चेत्- अत्र **व्याधिविशेषः** इति अपस्मारलक्षणे प्रत्येकशः उल्लेखात् बीभत्सभयानकयोः अस्यैव व्याधेरङ्गत्वं नान्यस्य इति, ज्ञायते । विप्रलम्भे तु व्याध्यन्तरस्यापि अङ्गत्वम् इति च ज्ञायते ।

## VIII. 6. xi. चपलतामर्षयोः

अमर्षादिजन्यवाक्पारुष्यादिकारणीभूता चित्तवृत्तिः **चपलता** । मौनवाक्पारुष्यादिकारणीभूतः चित्तवृत्तिविशेषः **अमर्षः** । एवञ्च उभयत्रापि वाक्पारुष्यादिकारणीभूतचित्तवृत्तित्वस्यातिशिष्टत्वात् अनयोः को वा भेदः ? इत्युक्ते– अमर्षः एव प्रकृष्टस्सन् इदं प्रथमतया तत्काले अनुभूयमानः 'चपलता'शब्दशब्दितो भवति इति भेदोऽनुसन्धेयः । एवं कतिपयभावानां पण्डितरोजोक्तदिशा पारस्पारिकः भेदः विचारितः ।

**स्वावलोकनप्रश्नाः**

१. कयोः कयोः भेदः अत्र निरूपिताः ?

२. उग्रतामर्षयोः कथमभेदः ? कथं च भेदः ?

३. त्रयाणां भावानां पारस्परिकः भेदः अत्र साधितः ते भावाः के ?

इदानीं भावानां पदव्यङ्ग्यत्वं विचारयामः ।

## VIII. 7. भावानां पदप्रकाश्यत्वम्

मम्मटाचार्यः चतुर्थोल्लासे **पदेऽप्यन्ये** इति कारिकया केषाञ्चित् ध्वनिप्रभेदानाम् अर्थान्तर-सङ्क्रमित-वाच्यादीनां पदव्यङ्ग्यत्वं संसूच्य **भावानां पदप्रकाश्यत्वे अधिकं न वैचित्र्यम्** इति कथयन् भावध्वनेः पदप्रकाश्यतां निराचकार । परम् **तन्मञ्जुमन्दहसितं श्वसितानि तानि** इति पद्ये तत् **तानि, सा** इति पदानां प्रत्येकशः नायिका हास-श्वसित-मुखशोभास्मृतिव्यञ्जकत्वात् ।

एवम् **अधुना खलु हन्त सा कृशाङ्गी गिरमङ्गीकुरुते न भाषितापि** इति मरणाख्यभाव-ध्वन्युदाहरणेऽपि हन्तपदस्य मरणाख्यभावस्फोरकत्वात् भावानां पदव्यङ्ग्यत्वे न किञ्चित् बाधकम्। एवञ्च काव्यप्रकाशकारोक्तसिद्धान्तविलक्षणतया भावानामपि पदप्रकाश्यत्वमत्र वर्णितम्।

**स्वावलोकनप्रश्नाः**

१. भावानां पदप्रकाश्यत्वं कथं वारितं मम्मटेन ?

२. भावानां पदप्रकाश्यत्वं कथं साधितं जगन्नाथेन ?

## VIII. 8. भावानां रसानां च भेदः

एवं पण्डितराजेन अत्यन्तं सूक्ष्मतया विचारितेऽस्मिन् भावविचारे कयोश्चित् भावरसयोरपि स्फुटतया भेदः प्रसङ्गवशान्निरूपितः ।

i. गर्ववीररसयोः ii. मतिशान्तयोः iii. अमर्षक्रोधयोः

iv. उग्रताक्रोधयोः v. स्थायिव्यभिचारिणोः

—निर्वेदयोः च भेदः वर्णितः इति शम् ।।

## VIII. 9. पाठ्यांशेऽस्मिन् सम्भाविताः प्रश्नाः

### विंशत्यङ्कप्रश्नाः

1. पण्डितराजाभिमतं भावलक्षणं सोपपत्तिकं सोदाहरणं निरूप्य भावाभिव्यञ्जकसामग्रीं विवेचयत ?
2. पण्डितराजभावलक्षणेषु वैशिष्ट्यं निरूप्य चतुस्त्रिंशत् भावानां लक्षणानि विवेचयत ?
3. कतिपयभावानां पारस्परिकभेदं निरूपयत ?

### दशाङ्कप्रश्नाः

1. स्मृतिव्रीडयोः लक्षणोदाहरणे विवेचयत ?
2. विबोध-अमर्ष-उग्रतानां स्वरूपम् ?

### पञ्चाङ्कप्रश्नाः

1. भावाभिव्यक्तौ मतभेदाः 2. भावसङ्ख्या 3. दैन्यम्

4. मदः 5. गर्वः 6. विबोधः

7. उग्रता 8. मरणम् 9. भावानां पदप्रकाश्यत्वम्

# IX. रसाभासादिमीमांसा

## IX. 1. रसाभासविचारः

भावविचारानन्तरं पण्डितराजप्रवर्तितेषु विचारेषु रसाभासविचारो मुख्यः । तत्र को नाम रसाभासः ? इत्युक्ते पण्डितराजः **अनुचितविभावालम्बनत्वं रसाभासत्वम्** इति पूर्वपक्षलक्षण-मेकमाह । अनुचितविभावालम्बनः यः रत्यादिः स एव रसाभासः इति तस्य लक्षणस्य सामान्यतः अर्थः । लक्षणेऽस्मिन् अनौचित्यं विभावस्यैव विशेषणं न रत्यादेः । विभावानौचित्यं च लोकानां व्यवहारतो विज्ञेयम्, यत्र तेषामयुक्तम् इति धीः जायते, तदेवानौचित्यम् । एवञ्च मुनिगुरुपत्नी-विषयकरतेः अनुचितविभावालम्बनत्वेन तत्रत्य रतौ रसाभासलक्षणस्य समन्वयः ।

अपरे त्वेतत् लक्षणं न क्षमन्ते । मुनिगुरुपत्नीविषयिण्याः रतेः अनुचितविभावालम्बनत्वेन सङ्ग्रहेऽपि, अनेन रसाभासलक्षणेन एकस्याः स्त्रियः बहुनायकविषयिण्याः रतेः, अनुभयनिष्ठायाः रतेश्च असङ्ग्रह एव, तस्याः अनुचितविभावालम्बनत्वाभावात् । यतो हि रत्याख्यस्थायिभावव्यवहारः आलम्बनाश्रयाभ्यां निरुह्यते । तत्र बहुनायकविषयकरतिस्थले आलम्बनविभावेन न किञ्चित् अनौचित्यम्, केवलमाश्रये एकस्यामनेकरतिप्रवृत्तनायिकायामेवानौचित्यम् ।

एवम् अनुभयनिष्ठरतिस्थलेऽपि रावणादेः नायकस्याश्रयस्यैवानुचितरतिप्रवृत्तत्वेन अनौचित्यम् । विभावत्वेन सम्भाव्यमानसीतायां तु नानौचित्यम् । ततश्च पूर्वोक्तस्थलद्वये अनुचितविभावालम्बन-त्वाभावेन तत्र रसाभासत्वायोगः । तस्मात् अनौचित्यं विभावान्निष्कास्य रत्यादिचित्तवृत्तिगतत्वेन विशेषणीयम्। एवञ्चानुचितविभावालम्बनायाः बहुनायकविषयायाः अनुभयनिष्ठायाश्च रतेस्सङ्ग्रहः सेत्स्यति । अनौचित्यं तु अयुक्तबुद्धिविषयत्वम् । एतदभिप्रायेणैव काव्यप्रकाशकारोऽपि— **तदाभासा ह्यनौचित्यप्रवर्तिताः** इति अनुचितरत्यादिरूपत्वमेव रसाभासस्य लक्षणमाह ।

**स्वावलोकनप्रश्नः**

१. रसाभासस्य पूर्वपक्षलक्षणं किम् ?

२. तस्य लक्षणस्य कथं समन्वयः ?

३. पूर्वपक्षीये लक्षणे के दोषाः ?

४. निष्कृष्टं रसाभासलक्षणं किम् ?

## IX. 1. i. रसाभास शब्दविचारः

ननु रसाभासशब्दस्य कोऽर्थः ? यतस्तत्र रसः आभासः इति शब्दद्वयमस्ति । तत्र यः रसः सः अनौचित्यस्य अत्यन्तं दूरवर्ती इति, आभासो न भवति। यस्तु आभासः स च अनौचित्यजुष्ट एवेति न तस्य रसत्वम्। एवं रसत्वाभासयोः एकत्र समावेशाभावात् कथं रसाभासत्वम् इति चेत्—

## IX. 1. ii. एकेषां मतम्

हेत्वाभासत्वमिव हेतुत्वेन इति एकेषां समाधानम् । यतो हि— **पक्षसत्त्व-सपक्षसत्त्व-विपक्षासत्त्वादिधर्मविशिष्ट एव हेतुः ।** तस्य च आभासत्वं नोपपद्यते । अतः यद्यपि हेत्वाभासशब्दव्यपदेश एव कठिनः भवेत् । तथापि तादृशस्थले हेतुपदस्य पञ्चम्यन्तप्रतिपाद्यार्थ-परत्वमाश्रित्य यथा तत्राभासत्व-सामानाधिकरण्यम् (अभासत्वसमावेशः) उपपाद्यते, एवम् रसाभासपदस्थलेऽपि वस्तुतः वीतविघ्नप्रतीति-ग्राह्यभावस्य अथवा भग्नावरणायाः रत्याद्यवच्छिन्नायाः चितः रसत्वात्, तस्य च निर्मलत्वेन आभासत्वायोगेऽपि यथाकथञ्चित् तत्र रसपदस्य रत्यादिमात्रपरत्वमाश्रित्याभासत्वं योजनीयमित्येकेषां मतम् ।

## IX. 1. iii. अपरे तु मतम्

भोजराज विश्वेश्वरकविचन्द्रादयः रसस्य आभासावस्थामपि पश्यन्तः शक्तिहीने अश्वे अश्वाभासव्यवहारवत् अनौचित्यजुष्टे रसे रसाभासत्वव्यवहारं समर्थयन्ति। एवं रसाभासपदस्य द्वेधा अर्थसाङ्गत्यं विज्ञेयम्।

**स्वावलोकनप्रश्नः**

१. रसाभासपदनिर्वचने मीमांसा कथं प्रवर्तिता ?

२. अत्र लक्षणे द्वयं किम् ?

३. प्रथमलक्षणे किम् अस्वारस्यम् ?

४. द्वितीये लक्षणे कथं समर्थनम् ?

## IX. 1. iv. नवरसेषु विद्यमाना आभाससरणिः

अलङ्कारशास्त्रे प्रायशः रसाभासशब्दं शृङ्गाराभासपर्यायतया इव बहवः प्रयुञ्जते। अत एव रसाभासत्रैविध्यं निरूपयतापि **शृङ्गारतिलककारेण——**

**एकत्रैवानुरागश्चेत्तिर्यङ्म्लेच्छगतोऽपि वा ।**
**योषितो बहुसक्तिश्चेत् रसाभासस्त्रिधा मतः ।।**

इति शृङ्गाररसाभास एव रसाभासत्वेन व्यवहृत्य त्रेधा प्रदर्शिता । पण्डितराजस्तु (शृङ्गाररसात्) अन्येषामपि रसानाम् आभासव्यवहारमेवं पर्यगणयत् । तत्र—

१. कलहशीलकुपुत्राद्यालम्बनतया, वीतरागनिष्ठतया च वर्ण्यमानः शोकः करुणाभासः ।

२. ब्रह्मविद्यानधिकारिचण्डालादिगतत्वेन च निर्वेदः शान्ताभासः ।

३. & ४. कदर्य-कातरादिगतत्वेन (नीच-भीरुगतत्वेन) पित्राद्यालम्बनत्वेन वा वर्ण्यः क्रोधः उत्साहश्च रौद्राभासः वीराभासश्च ।

५. ऐन्द्रजालिकाद्यालम्बनत्वेन वर्ण्यमानः विस्मयः अद्भुताभासः ।

६. गुर्वाद्यालम्बनतया विद्यमानः हासः हास्याभासः ।

७. महावीरगतत्वेन वर्ण्यमानं भयं भयानकाभासः ।

८. यज्ञीयपशुवसासृङ्मांसाद्यालम्बनतया वर्ण्यमाना जुगुप्सा बीभत्साभासः ।

।। इति नवरसानामाभासप्रकाराः पण्डितराजेन वर्णिताः ।।

**स्वावलोकनप्रश्नः**

१. नवरसानां रसाभासत्वं स्पष्टयत ?

## IX. 1. v. शृङ्गाराभासः

शृङ्गाराभासः **संयोगशृङ्गाराभासः, विप्रलम्भशृङ्गाराभासः** इति संक्षेपतो द्विविधः । तत्र साहित्यदर्पणे शृङ्गाराभासस्य, तत्रापि विशेषतः सम्भोगशृङ्गाराभासस्य चत्वारः प्रकाराः इत्थं निरूपिताः—

**उपनायकसंस्थायां मुनिगुरुपत्नीगतायाञ्च**
**बहुनायकविषयायां रतौ तदानुभयनिष्ठायाम् ।।** इति ।

अत्र मुनिगुरुशब्दयोः उपलक्षणतया राजादिरपि गृह्यते । तत्र—

**(अ) राजरमण्यालम्बनस्य शृङ्गाराभासस्योदाहरणं यथा—**

**शतेनोपायानां कथमपि गतः सौधशिखरं**
**सुधाफेनस्वच्छे रहसि शयितां पुष्पशयने ।**
**विबोध्य क्षामाङ्गीं चकितनयनां स्मेरवदनां**
**सनिश्श्वासं श्लिष्यत्यहह सुकृती राजरमणीम् ।। (पृ. १२०)**

अत्र अनुचितप्रणया राजरमणी आलम्बनम्। रहो रजन्याद्युद्दीपनम् । साहसेन राजान्तःपुरे गमनम्, प्राणेषु उपेक्षा, निश्श्वासाश्लेषादयश्चानुभावाः । शङ्कादयः सञ्चारिणः । अत्र च राजरमणीरूपनिषिद्धालम्बनकत्वात् अस्याः रतेः आभासत्वम् । न चात्र **चकितनयनाम्** इत्यनेन परपुरुषस्पर्शजनितत्रासाभिव्यक्त्या रतेः अनुभयनिष्ठता इति, अनुभयनिष्ठरसाभासस्यैव इदमुदाहरणमिति वाच्यम् ।

चिराय तस्मिन्नासक्तायाः तस्याः अन्तःपुरे परपुरुषागमनस्य अत्यन्तमसम्भावनया हठात् आगतव्यक्तिविषये प्रत्यभिज्ञानाभावेन कथमेष मां बोधयति इति प्रथमतः त्रासस्य उचितत्वेऽपि, ततः परिचयाभिव्यक्त्या **सोऽयं मत्प्रियः मदर्थं प्रणानपि तृणीकृत्यागतः** इति ज्ञानात् हर्षभाव एव युक्तः । अयमेव भावः **स्मेरवदनाम्** इति विशेषणेन अभिव्यञ्जितः ।

एवञ्च राजरमण्यालम्बनायाः नायकनिष्ठायाः रतेः सकलवाक्यार्थत्वात् तस्या एव उदाहरणं नानुभयनिष्ठायाः रतेः ।

**(आ) बहुनायकविषया रतिः यथा—**

**भवनं करुणावती विशन्ती गमनाज्ञालवलाभलालसेषु ।**
**तरुणेषु विलोचनाब्जमालामथ बाला पथि पातयाम्बभूव ।।**

अत्र कुतश्चित् अगच्छन्त्याः पथि तदीयरूपयौवनगृहीतमानसैः युवभिः अनुगम्यमानायाः कस्याश्चित् भवनप्रवेशसमये तदीयाज्ञालवलाभायापि स्पृहयतां तरुणानां विषये गमनाज्ञानिवेशकस्य विलोचनाब्जमाला-परिक्षेपरूपस्य अनुभावस्य वर्णनात् अभिव्यज्यमाना रतिः तरुणेषु इति बहुविषयत्वेन अवभासमाना रसाभासो भवति ।

**(इ) अनुभयनिष्ठा रतिः यथा—**

**भुजपञ्जरे गृहीता नवपरिणीता वरेण वधूः ।**
**तत्कालजालपतिता बालकुरङ्गीव वेपते नितराम् ।।**

अत्र नवोढायाः वध्वाः रत्या मनागप्यस्पर्शात् तस्याः नायकबाहुपरिष्वङ्गस्थिताया अपि तत्कालजालपतितबालकुरङ्गीरूपणेन वेपतनात्मकस्य अनुभावस्य वर्णनात्, तेन च व्यक्तायाः रतेः केवलनायकनिष्ठत्वेन नायिकानिष्ठत्वाभावात् अनुभयनिष्ठायाः रतेः इदमुदाहरणम् ।

**(ई) विप्रलम्भाभासो यथा—**

**व्यत्यस्तं लपति क्षणं क्षणमधो मौनं समालम्बते**
**सर्वस्मिन्विदधाति किञ्च विषये दृष्टिं निरालम्बनाम्।**
**श्वासं दीर्घमुरीकरोति न मनागङ्गेषु धत्ते धृतिं**
**वैदेही कमनीयताकवलितो हा हन्त! लङ्केश्वरः ।।**

अत्र लङ्केशगता सीतालम्बना विप्रलम्भा रतिः सीतानाश्रया सती केवललङ्केशगतेति अनुभयनिष्ठा। एवमेव सीतायाः जगद्गुरुरामपत्नीत्वेन तद्विषयिणी रतिः मुनिगुर्वादिपत्नीगतेत्यपि अत्राभासरूपा । सा च व्यत्यस्तालापमौनाश्रयणादिना अनुभाविता, व्यत्यस्तालापसूचितोन्मादेन, मौनसमालम्बनसंसूचितश्रमेण, निरालम्बनदृष्टिस्वीकारव्यक्तमोहेन, दीर्घश्वाससंसूचितचिन्तया, अङ्गेषु धृत्यभावाभिव्यक्तव्याधिना च परिपुष्टा अनुचिता चेति आभासपदव्यपदेश हेतुः ।

**स्वावलोकनप्रश्नः**

१. शृङ्गाराभासः कुतः विशेषतया निरूपितः ?

२. सम्भोगशृङ्गाराभासः कथम् ?

३. विप्रलम्भशृङ्गाराभासस्य उदाहरणं किम् ? कथं समन्वयः ?

## IX. 1. vi. द्रौपदीगतः अनुरागः किं रूपः ?

ननु **बहुनायकविषयायां रतौ तथानुभयनिष्ठायाम्** इति कारिकाभागेन दर्पणकारेण बहुनायक-विषयारतिः आभासत्वेन वर्णिता । एवं सति द्रौपदीगता पञ्चपाण्डवविषयिणी रतिः किम् आभासरूपा? उत रसीभावयोग्या? इति सन्देहः ।

**(अ)** तत्र च अभासरूपत्वमेव युक्तमिति नव्याः। तथा हि—

**व्यानम्राश्चलिताश्चैव स्फारिताः परमाकुलाः ।**
**पाण्डुपुत्रेषु पाञ्चाल्याः पतन्ति प्रथमा दृशः ।।**

अत्र द्रौपद्याः विशिष्टाः प्रथमाः दृशः पाण्डुपुत्रेषु पतन्तीति वाक्यार्थः । के वा द्रौपदीदृग्गताः विशेषाः इत्युक्ते युधिष्ठिरे तस्यास्सभक्तिकत्वेन धर्मात्मताप्रयोज्यं व्यानम्रत्वम् एको विशेषः । स्थूलाकारताप्रयोज्यभीमसेनविषयकसत्रासत्त्वसंसूचकचलितत्वमपरो विशेषः । अर्जुनसम्बन्ध्यलौकिक-शौर्यश्रवणप्रयोज्यसहर्षत्वसूचकस्फारित्वम् अन्यो विशेषः । नकुलसहदेवयोस्तु परमसौन्दर्यसन्दर्शन-प्रयोज्यमौत्सुक्यमभिव्यञ्ज्यत् परमाकुलत्वमपरो विशेषः ।

एवञ्चात्र द्रौपदीगतरतेः विशिष्टदृग्भिः व्यञ्जितायाः बहुनायकविषयत्वात् रतेः आभासत्वं प्रसज्येत इति चेत् —इष्टापत्तिरेवेति **नव्याः, कार्यकारणभावबद्धश्रद्धाः हेतुवादिनः** ऊचिरे ।

**(आ) प्राचीनास्तु** अपरिणेतृबहुनायकविषयायाः रतेः आभासत्वम्, परिणेतृबहुनायकविषयायाः रतेस्तु नाभासता। एवञ्च युधिष्ठिर-भीम-अर्जुन-नकुल-सहदेवाः द्रौपदीविशिष्टदृष्टिविषयत्वेन श्लोकेऽस्मिन् वर्णिताः मातृवचनानुसारेण धर्मबद्धतया द्रौपद्याः परिणेतार एवेति तद्गतायाः रतेः नाभासत्वम्, अपरिणेतृबहुनायकविषयत्वे तु रतेः अभासतैव इति सम्प्रदायबद्धश्रद्धाः प्राञ्चः अत्र सम्भावयन्ति ।

**स्वावलोकनप्रश्नः**

१. बहुनायकविषया रतिः आभासरूपा चेत् द्रौपदीगता पञ्चपाण्डवविषया रतिः का ?

२. प्राचीनानां रसत्वविषये समर्थनं कथम् ?

३. नवीनानां विषये रसाभासत्वं कथम् ?

## IX. 2. भावाभासविचारः

अनुचितो भावः भावाभासः । स च प्राधान्येन अभिव्यङ्ग्यः भावाभासध्वनिः इत्युच्यते । यथा—

**सर्वेऽपि विस्मृतिपथं विषयाः प्रयाता**
**विद्याऽपि खेदकलिता विमुखीबभूव ।**
**सा केवलं हरिणशाबकलोचना मे**
**नैवापयाति हृदयादधिदेवतेव ।। पृ. १२३.**

गुरुकुले विद्याभ्याससमये गुरुकन्यालावण्यादिना गृहीतमनसः कस्यचित् अथवा प्रतिषिद्धगमनायां भ्रंशितमनसः अन्यस्य वा कस्यचिदियमुक्तिः । अत्र चिरसेवितानामपि शास्त्रादिविद्यादीनाम् एतदीयात्मत्यागेन कृतघ्नत्वम्, सकृद्दर्शनपथं गतयाऽपि तया एतदीयात्मत्यागात् प्रतिषिद्धगमनायामथवा गुरुपुत्र्यां कृतज्ञत्वं व्यतिरेकालङ्कारध्वनिना व्यज्यमानं स्मृतिं पुष्णाति।

एषा च **सा केवलम्** इत्यादिना अभिव्यक्ता **नैवापयाति हृदयादधिदेवतेव** इति देवतौपम्यम् अपि तस्याः सर्वाधिकत्वं सूचयन्ती स्मृतिं परिपोषयति ।

एवं चात्रानुचितालम्बनकत्वात्, केवलं नायकमात्रनिष्ठत्वेनानुभयनिष्ठत्वाच्च भावस्य अभासत्वम्, प्राधान्येन व्यज्यमानत्वाच्च ध्वनित्वम् । यदि एषा उक्तिः कस्यचित् परिणेतुः काञ्चित् परिणेयां प्रति स्यात्, तर्हि भावे अनौचित्याभावेन भावध्वनित्वस्यैव इदमुदाहरणम् ।

**स्वावलोकनप्रश्नः**

१. **सर्वेऽपि विस्मृतिपथम्** इत्यादिपद्ये रसाभासत्वं कथम् ?

२. अत्र भावध्वनिः कदा भवति ?

# IX. 3. पाठ्यांशेऽस्मिन् सम्भाविताः प्रश्नाः

## विंशत्यङ्कप्रश्नौ

1. रसाभासलक्षणं परिष्कृत्य रसाभासशब्दविचारपूर्वकं नवरसेषु आभाससरणिं दर्शयत ?
2. शृङ्गाराभासे विविधप्रकारान् सोदाहरणं निरूप्य द्रौपदीगतानुरागस्य शृङ्गाररसत्वं शृङ्गाराभासत्वं वेति विवेचयत ?

## पञ्चाङ्कप्रश्नाः

1. नवरसेषु आभाससरणिः
2. भावाभासविचारः
3. विप्रलम्भशृङ्गाराभासः

# X. भावशान्त्यादिमीमांसा

एतावता प्रबन्धेन रस-भाव-रसाभास-भावाभासाख्याः असंलक्ष्यक्रमध्वनिभेदाः निरूपिताः । इदानीं तु—

1. भावशान्ति-भावोदय-भावसन्धि-भावशबलताख्यानामसंलक्ष्यक्रमध्वनिभेदानां निरूपणम्,
2. भावोदयादिषु सर्वत्र भावध्वनित्वनिरूपणम्
3. रत्यादीनां संलक्ष्यक्रमत्वनिरूपणम्
4. रसादिध्वन्यभिव्यञ्जकनिरूपणं च विधास्यते ।

## X. 1. भावशान्त्यादिविचारः

### X. 1. i. भावशान्तिः

**भावस्य प्रागुक्तस्वरूपस्य शान्तिः नाशः** इति भावशान्तेः स्वरूपं पण्डितराजेन उक्तम् । भावो नाम विभावादिव्यज्यमानहर्षाद्यन्यतमः । तस्य उत्पत्त्यवच्छिन्नस्य उत्पत्तिकालसम्बद्धस्य नाश एव भावशान्तिः। उत्पन्नस्य कस्यचित् भावस्य उत्पत्तिकाले एव नाशस्य सहृदयचमत्कारित्वात् । यदि भावः प्ररूढः स्यात् तर्हि तस्य नाशवर्णने अचमत्कारित्वमेव । अतः उत्पत्तिकालीनभावस्य नाश एव अत्र विवक्षितः । यथा—

**मुञ्चसि नाद्यापि रुषं भामिनि मुदिरालिरुदियाय।**
**इति तन्व्याः प्रतिवचनैरपायि नयनाब्जकोणशोणरुचिः ।।**

अत्र पत्युः सान्त्वनवचनैः पूर्वपादद्वयोक्तैः तन्व्याः नयनकोणशोणरुचिः अपायि = पीतः (पाधातोः कर्मणि लुङ्) इति वाक्यार्थः । तत्र च प्रियवचनश्रवणं विभावः । नयनकोणगतशोणरुचेः नाशः, तदभिव्यक्तः प्रसादो वा अनुभावः । एवं विभावानुभावाभ्यामुत्पत्तिकालावच्छिन्नस्य नायिकारोषस्य

प्रशमस्य अभिव्यक्तेः अत्र भावशान्तिध्वनिः । अत्र च शोणरुच्या रोषस्य, शोणरुचिकर्मकप्रतिवचनकर्तृकपानेन रोषस्य प्रशमस्य च अभिव्यक्तिः । अस्य च अन्यभावं प्रत्यनङ्गत्वात् ध्वनित्वम् ।

**स्वावलोकनप्रश्नः**

१. भावस्य लक्षणं किम् ?

२. भावशान्तिः नाम का ?

३. उदाहरणे भावशान्तिं समन्वयत ।

## X. 1. ii. भावोदयः

**भावस्योत्पत्तिः भावोदयः** । यथा—

**वीक्ष्य वक्षसि विपक्षकामिनीहारलक्ष्म दयितस्य भामिनी ।**
**अंसदेशवलयीकृतां क्षणादाचकर्ष निजबाहुवल्लरीम् ।।**

अत्र दयितवक्षोगतविपक्षकामिनीहारलक्ष्मदर्शनं विभावः । प्रियांसदेशवलयीकृतायाः नायिकाबाहुलतायाः आकर्षणमनुभावः । तेन च रोषोदयः व्यज्यते । यत्र च प्रियगाढपरिष्वङ्गे स्वबाहुलतायाः अवस्थानं नायिकायाः युक्तम्, तत्र तदकृत्वा स्वबाहुलताकर्षणात् कोपः व्यज्यते । क्षणादाचकर्ष इत्यनेन तदानीमेव कोपस्य उदयः सूच्यते । एवं चात्र रोषोदयस्य ध्वनिः ।

यद्यपि भावशान्तौ चरमावस्थायां भावान्तरोदयस्य, भावोदये वा पूर्वभावशान्तेः आवश्यकत्वात्, अत्र भावशान्तिः, अत्र भावोदयः इति स्पष्टतया वक्तुं न शक्यते । तथापि द्वयोरपि अवस्थयोः एकत्र चमत्कारविरहात् चमत्काराधीनत्वात् तत्तद्ध्वनिव्यवहारस्य, यत्र भावोदयकृतश्चमत्कारः, तत्र पूर्वभावप्रशमकृतचमत्कारस्य अभावात्, यत्र च भावप्रशमकृतः चमत्कारः तत्र, भावान्तरोदयकृतचमत्कारभावाच्च तत्तत्स्थलेषु तत्तद्ध्वनिव्यवहार एव, न अन्यादृशव्यवहारः ।

**स्वावलोकनप्रश्नः**

१. भावोदयस्य लक्षणं किम् ?

२. भावशान्ति-भावोदययोः परस्परं भेदाः कथम् ?

## X. 1. iii. भावसन्धिः

भावसन्धिरन्योन्यानभिभूतयोः अन्योन्याभिभवनयोग्ययोः सामानाधिकरण्यम् । यत्र भावयोः सुन्दोपसुन्दन्यायेन परस्परं बाधितत्वं नास्ति, किन्तु प्रबलयोधद्वयवत् परस्पराभिभवनयोग्यता अस्ति, तत्र भावसन्धिः । बाधितत्वे अन्यतरस्यैव भावस्यावस्थानम्, एवं परस्पराभिभवक्षमतायाः अभावेऽपि एकस्यैव प्राधान्येन अवस्थानं स्यात्, न तु द्वयोर्भावयोः सन्धीयमानत्वमिति दलद्वयम् ।

**यौवनोद्गमनितान्तशङ्किताः शीलशौर्यबलकान्तिलोभिताः ।**
**सङ्कुचन्ति विकसन्ति राघवे जानकीनयननीरजश्रियः ।। पृ. २५.**

पद्येऽस्मिन् तरुण्याः सीतायाः भगवद्दाशरथिगतलोकोत्तरयौवनदर्शनेन विभावेन नयनगत-सङ्कोचानुभाववती लज्जा व्यज्यते । एवं तथा भगवद्दाशरथिशीलसौन्दर्यदर्शनेन विभावेन विकासानुभावितः औत्सुक्याख्यश्च भावः व्यज्यते । तथा चात्र व्रीडौत्सुक्ययोः परस्पराबाध्ययोः परस्परस्पर्धार्थिनोः अभिव्यक्तेः भावसन्धिः ।

**स्वावलोकनप्रश्नः**

१. भावसन्धेः स्वरूपं जानीत ।

२. उदाहरणे लक्षणसमन्वयं कुरुत ।

## X. 1. iv. भावशबलता

भावशबलत्वं भावानां बाध्यबाधकभावम् आपन्नानाम् उदासीनानां वा व्यामिश्रणम् । भावसन्धौ द्वयोर्भावयोः पृथक् पृथक् अवस्थानेन परस्परस्पर्धार्थित्वेन चमत्कारः । अत्र तु भावानां पूर्वपूर्वतया अवस्थितानां कदाचित् बाध्यबाधकभावः, कदाचित् औदासीन्यञ्च परस्परसम्बन्धे दृश्येते । तेन एकचमत्कृतिजनकज्ञानगोचरतालक्षणं शबलत्वम् इति पर्यवस्यति । अत्र भावशबलता-स्वरूपनिरूपणे भावानां शबलत्वस्यावगाहनार्थं पण्डितराजेन एकमतिसुन्दरोदाहरणं दत्तं श्लोकरूपेण-

**नारिकेलजल-क्षीर-सिता-कदलमिश्रणे ।**
**विलक्षणो यथाऽऽस्वादो भावानां संहतौ तथा ।।**

एवञ्च नारिकेलजल-क्षीर-सिता-कदलानां मिश्रण इव विलक्षणारुचिः भावशबलतास्वादे जायते। यथा–

**पापं हन्त मया हतेन विहितं सीतापि यद्यापिता**
**सा मामिन्दुमुखी विना बत वने किं जीवितं धास्यति।**
**आलोकेय कथं मुखानि कृतिनां किं ते वदिष्यन्ति मां**
**राज्यं यातु रसातलं पुनरिदं न प्राणितुं कामये ।।**

अत्र "यज्ञभूमिसमुत्पन्ना वह्निपरीक्षितशीला सीतापि वनं प्रापिता इति यत् तत् महत्पापम्" इति कथयता रामेण स्वीयायाः शास्त्रजन्यार्थनिर्धारणात्मिकायाः मतेः, हतेन इत्यनेन सीतोत्कर्ष-दर्शनजायाः आत्मापकर्षहेतुभूतायाः असूयायाः, **सीतापि** इत्यनेन विषादस्य, **सा** इत्यनेन स्मृतेः, **मामिन्दुमुखी विना** इत्यनेन वितर्कस्य **आलोकेय कथं मुखानि कृतिनाम्** इत्यनेन व्रीडायाः, **किन्ते वदिष्यन्ति माम्** इत्यनेन शङ्कायाः, **राज्यं यातु रसातलम्** इत्यादिना निर्वेदस्य च अभिव्यञ्जनात्, एवं मति-असूया-विषाद-स्मृति-वितर्क-व्रीडा-शङ्का-निर्वेदानाम् एकचमत्कार-प्रतीतिविषयतया अभिव्यक्तेः इदं भावशबलताध्वनेः उदाहरणम्।

**स्वावलोकनप्रश्नः**

१. भावसन्धि-भावशबलतयोः भेदः कथम् ?

२. भावशबलताध्वनेः उदाहरणे लक्षणसमन्वयं कुरुत ।

## X. 1. v. यत्तु-मतखण्डनम्

काव्यप्रकाशटीकाकाराः केचित् **उत्तरोत्तरभावेन पूर्वपूर्वभावोपमर्दः शबलता** इति व्याख्यातवन्तः । परं भावानां शबलत्वं नाम उत्तरोत्तरभावेन पूर्वपूर्वभावस्य उपमर्दः शबलता इति वक्तुं न शक्यते । यतो हि—

**पश्येत्कश्चिच्चल चपल रे का त्वराहं कुमारी ।**
**हस्तावलम्बं वितर हहहा व्युत्क्रमः क्वासि यासि ।।**

इति पञ्चमोल्लासे मम्मटाचार्येण निरूपिते भावशबलताख्यालङ्कारे (गुणीभूतव्यङ्ग्ये) वर्णनीयराजगतरतिभावाङ्गभूते **पश्येत्कश्चित्** इत्यत्र शङ्कायाः, **चल चपल रे** इत्यत्र असूयायाः, **का त्वरा** इत्यत्र धृतेः, **अहं कुमारी** इति स्मृतेः, **हस्तावलम्बं वितर** इत्यत्र श्रमस्य **ह ह हा** इत्यनेन दैन्यस्य, **व्युत्क्रमः** इत्यनेन मतेः, **क्वासि यासि** इत्यनेन औत्सुकस्य व्यक्तावपि, शङ्कासूयाधृतिश्रमदैन्यमत्यौत्सुक्यानाम् उपमर्दलेशशून्यत्वेन भावशबलत्वं न स्यात् । तत्र भावानां केवलमौदासीन्येन उपमर्द्योपमर्दकभावाभावात्। अतश्च भावशबलत्वं किमात्मकमिति चेत् उच्यते– एकचमत्कृतिजनकज्ञानविषयत्वलक्षणमेव, न तु पूर्वोक्तरीत्या उपमर्द्य-उपमर्दकभावलक्षणमात्रम् ।

न च सांख्यवेदान्तादीतरमतेषु चित्तवृत्तीनां भावानाम्, तार्किकरीत्या आत्मविशेषगुणत्वेन स्वोत्तरवर्तिगुणनाश्यत्वलक्षणः पूर्वभावोपमर्दः सम्भवत्येवेति वाच्यम् । तादृशपूर्वभावनाशस्य व्यङ्ग्यत्वे वा उपमर्दशब्दवाच्यत्वे वा चमत्कारित्वे वा प्रमाणाभावात् । एवञ्च बाध्यबाधकभावौदासीन्यात्मकव्यामिश्रणम् एकचमत्कृतिजनकज्ञानगोचरतारूपमेव न केवल बाध्यबाधकभावात्मकम् अथवा उपमर्द्योपमर्दकभावात्मकम् इति शम् ।

**स्वावलोकनप्रश्नः**

१. भावशबलतायाः लक्षणं काव्यप्रकाशटीकानुसारं स्पष्टयत ।

२. **पश्येत्कश्चित्** इत्यादिश्लोके के के भावाः अभिव्यज्यन्ते ?

## X. 2. भावोदयादिध्वनिषु सर्वत्र भावध्वनित्वमेव

पूर्वं भावशान्ति-भावोदय-भावसन्धि-भावशबलताध्वनयः उदाहृताः । ते च सर्वे भावध्वनय एव, न ततः अतिरिक्ताः, सर्वत्र च भावोदयादिषु उदयाद्यवस्थानाम् अप्राधान्यमेव, न प्राधान्यम्; प्राधान्यं तु भावस्यैवेति पण्डितराजस्य कश्चित् विलक्षणः सिद्धान्तः ।

यथा हि– भावध्वनौ भावस्य स्थितिरूपावस्थायाः सद्भावेऽपि तादृशावस्थाविशिष्टभावस्य प्राधान्यमास्थाय, तत्रैव ध्वन्यमानताकृतः चमत्कारः स्वीक्रियते, एवं भावोदय-भावशान्ति-भावसन्धि-भावशबलताध्वनिष्वपि उदय-विनाश-सन्धीयमानत्व-परस्परसमानाधिकरणत्व-रूपप्रकारैः चर्व्यमाणेषु भावेष्वेव प्राधान्यम्, चमत्कृतेः तत्रैव विश्रान्तेः । यद्यपि अवस्थाविशिष्टानां तत्तत्भावानां प्राधान्यम्? आहोस्वित् तत्तद्भावानाम् उदयप्रशमाद्यवस्थानां प्राधान्यम् ? इति संशये विनिगमकम्= अन्यतरपक्षनिर्णायकम् प्रमाणं नोपलभ्यते ।

तथापि (भावस्य) विद्यमानतादशायां भावस्यैव प्राधान्यस्य क्लृप्तत्वात् उदयप्रशमादिदशास्वपि भावेष्वेव विभावादिभिर्व्यज्यमानेषु प्राधान्यस्य कल्पयितुमुचितत्वात्, तस्यैव ध्वनित्वं युक्तम्। भावशान्त्यादौ भावो न प्रधानम्, किन्तु भावोपसर्जनकशान्त्यादिरूपा अवस्था एव प्रधानम् इति यद्यभ्युपगम्यते, तर्हि भावस्य व्यज्यमानत्वेऽपि यत्र उदयावस्थायाः वाच्यत्वं तत्र अभीष्टं भावोदयादिध्वनित्वं न स्यात् । यथा—

**उषसिप्रतिपक्षनायिकासदनादन्तिकमञ्चति प्रिये ।**
**सुदृशो नयनाब्जकोणयोरुदियाय त्वरयारुणद्युतिः ।।**

अत्र **उदियाय त्वरयारुणद्युतिः** इत्यत्र उत्पूर्वकेन इण् धातुना भावोदयस्य वाच्यतयैव प्रत्यायनात्, उदयस्याव्यङ्ग्यत्वात् अभीष्टं भावोदयध्वनित्वं न स्यात् । न च उदयस्य वाच्यत्वेऽपि रोषभावस्य ध्वनित्वमेवेति वाच्यम् । **प्राधान्येन व्यपदेशा भवन्ति** इति न्यायेन प्रधानं पुरस्कृत्यैव व्यवहारस्य युक्तत्वात् अवस्थाप्राधान्यवादिमते उदयाद्यवस्थाया एव प्राधान्यात्, तस्याश्च **उदियाय** इति स्वशब्दवाच्यत्वेन ध्वनित्वायोगात् ।

प्रधानं वाच्यं पुरस्कृत्य ध्वनिव्यवहारासम्भवे व्यङ्ग्येन अपि अप्रधानेन भावेन ध्वनित्वव्यपदेशस्य अयुक्तत्वात्, अवस्थाप्राधान्यवादिमते भावोदयादिध्वनिव्यवहारविलोमप्रसङ्गात्। अस्मन्मते तु अवस्थायाः उपसर्जनत्वेन भावस्य प्राधान्येन च भानात् भावोदयादिध्वनित्वं सुस्थम्।

एवं भावप्रशमादिष्वपि प्रशमाद्यवस्थाया एव प्राधान्यमिति यद्याग्रहः, तर्हि यत्र प्रशमस्य वाच्यत्वं तत्र अभीष्टं भावशान्तिध्वनित्वं न स्यात्। यथा—

**क्षमापणैकपदयोः पदयोः पतति प्रिये ।**
**शेमुः सरोजनयना नयनारुणकान्तयः ।। पृ. १२८.**

अत्र **सरोजनयना-नयनारुणकान्तिभिः** नायिकायाः रोषः व्यज्यते । व्यज्यमानस्य च रोषस्य **शेमुः** इति वाच्यवृत्त्या प्रशमो निबद्धः । यदि भावप्रशमध्वनौ प्रशमावस्थाया एव प्राधान्यमिति आग्रहः स्वीक्रियेत, तर्हि प्रधानस्य प्रशमस्य वाच्यत्वात् अप्रधानस्य कोपस्य च व्यङ्ग्यत्वात् प्राधान्यव्यङ्ग्यत्वयोः एकत्र समावेशाभावेन अभीष्टं भावप्रशमध्वनित्वं न स्यात् ।

ननु भावोदयादिध्वनिषु भावप्राधान्यवादिना अवस्थाप्राधान्यस्वीकारपक्षे उदयप्रशमाद्यवस्थानां वाच्यत्वे अभीष्टध्वनिव्यवहारः न स्यादित्यापत्तिः दत्ता । परम् एषा आपत्तिः न युज्यते । यतो हि— **शेमुस्सरोजनयना नयनारुणकान्तयः** इति भावप्रशमध्वन्युदाहरणे वाच्यस्य प्रशमस्य वाच्यभूतैः नयनारुणकान्तिभिरेव अन्वयात्, अरुणकान्त्यभिव्यङ्ग्येन रोषेण अनन्वयात्, कान्तिप्रशमस्यात्र वाच्यत्वेऽपि रोषप्रशमस्य अवाच्यत्वात्, तस्य च व्यङ्ग्यत्वेन अवस्थाप्राधान्य-वादिमतेऽपि भावप्रशमादिध्वनित्वमपि, युक्तमेव ।

एवञ्च भावप्रशमस्य वाच्यत्वमास्थाय ध्वनिव्यवहारविलोपापत्तिदानं भावप्राधान्यवादिना कृतमसङ्गतम्। न च आरुण्यस्य तद्व्यङ्ग्यस्य रोषस्य च एककालमेव वाच्यशमनादिक्रिययान्वयात् रोषप्रशमस्याऽपि वाच्यान्वयबोधविषयत्वेन वाच्यत्वमेवेति वाच्यम् । वाच्यव्यङ्ग्यप्रतीत्योः भिन्नकालि-कत्वेन तयोः क्रमेणैव बोधस्य अनुभवसिद्धतया, वाच्यैस्सह व्यङ्ग्यस्य अन्वयानुपपत्तेः ।

यदि वाच्यान्वयबोधवेलायामेव व्यङ्ग्यस्याप्यन्वयः **सदृशो नयनाब्जकोणयोः** इत्याद्युदाहरणे व्यङ्ग्यस्यापि रोषस्य वाच्येन उदयेन अन्वयात् तत्र अभीष्टं भावोदयध्वनित्वमपि न स्यात्। ततश्च **शेमुस्सरोजनयना** इत्यादिप्रशमध्वनौ वाच्यकाले व्यङ्ग्यस्य अनुपस्थिततत्वात् व्यङ्ग्यस्य तत्र अन्वयो न सम्भवतीति रोषप्रशमस्य अवाच्यत्वेन भावप्रशमध्वनित्वम् अवस्थाप्राधान्यवादिमतेऽपि उपपन्नमेवेति चेत् ।

अत्रोच्यते । यदि पूर्वोक्तयुक्त्या अवस्थाप्राधान्यवादिमते वाच्यायाः अवस्थायाः वाच्येन अन्वयेऽपि, व्यङ्ग्येन भावेन अनन्वयात् भावप्रशमादेः ध्वनित्वमेव इत्युच्यते, एवं तर्हि अवस्थाया एव प्राधान्यात् तस्य व्यङ्ग्यत्वमात्रेण भावस्य वाच्यत्वेऽपि भावप्रशमादिध्वन्यापत्तेः । यथा—

**निर्वासयन्तीं धृतिमङ्गनानां शोभां हरेरेणदृशो धयन्त्याः ।**
**चिरापराधस्मृतिमांसलोऽपि रोषः क्षणप्राघुणिको बभूव ।।**

इत्यादिपद्ये रोषस्य वाच्यतायामपि भावप्रशमध्वनित्वापत्तेः । अत्र **रोषः** इति पदेन रोषाख्यो भावः वाच्यतया अभिहितः । **क्षणप्राघुणिकः** इत्यत्र **क्षणकाल-अतिथिः** इत्यर्थकेन क्षणप्राघुणिकपदेन प्रशमावस्था अभिव्यक्ता ।

एवञ्चात्र अवस्थाप्राधान्यवादिमते रोषभावस्य वाच्यत्वेऽपि अवस्थायाः व्यङ्ग्यतामात्रेण भावप्रशमध्वनिव्यवहारापत्तिः । न च भाव-अवस्थयोर्द्वयोरेव व्यङ्ग्यत्वे भावप्रशमादिध्वनित्वं वक्तुं युक्तम् इति वाच्यम् । **भग्नो मानकलिः** इत्यादौ लोचनकारेण विनाशावस्थायाः भग्नशब्द-वाच्यत्वेऽपि भावप्रशमध्वनित्वस्य उदाहृतत्वात्, वस्तुतः सहृदयपक्षानुसारेण अवस्थायाः वाच्यत्वेऽपि ध्वनित्वस्य अनुभूयमानत्वाच्च, उभयव्यङ्ग्यतायाः भावप्रशमादिध्वनित्वे अप्रयोजकत्वात् ।

तस्मात् पण्डितराजेन प्रघट्टकेऽस्मिन् अन्वयव्यतिरेकव्यभिचाराभ्यां भावोदयादिध्वनिव्यवहारे अवस्थाव्यङ्ग्यतायाः अवस्थाप्राधान्यस्य वा अप्रयोजकत्वात्, भावव्यङ्ग्यताया एव प्रयोजकत्वात् सर्वत्र भावप्राधान्यम् आश्रितमिति फलितम् । **शेमुः, उदियाय** इत्यादौ अवस्थायाः व्यङ्ग्यत्वरूप-कारणाभावेऽपि रोषस्य अरुणकान्त्यादिव्यङ्ग्यत्वमात्रेण भावप्रशमादिव्यवहाररूपकार्यापत्तेः कारणाभावेऽपि कार्योत्पत्तिलक्षणः व्यतिरेकव्यभिचारः । **रोषः क्षणप्राघुणिको बभूव** इत्यत्र अवस्थाव्यङ्ग्यत्वरूपकारणसद्भावेऽपि भावप्रशमव्यवहाररूपकार्याभावात् कारणसत्त्वेऽपि कार्यानुत्पत्तिलक्षणः अन्वयव्यभिचारः ।

एवञ्च अन्वयव्यतिरेक-व्यभिचाराभ्यां भावोदयादिध्वनिषु अवस्थाप्राधान्यस्य ध्वनिव्यवहार-प्रयोजकत्वायोगात् सर्वत्र तादृशध्वनिषु भावस्यैव प्राधान्यं व्यङ्ग्यत्वञ्च, उदयाद्यवस्थानाम् अप्रधानानां तु वाच्यत्वम्, व्यङ्ग्यत्वं वा भवतु, तत्र न कश्चिन्निर्भरः इति शम् ।।

**स्वावलोकनप्रश्नः**

१. भावोदयादिषु कस्य प्राधान्यम् ?

२. उदयादीनां व्यङ्ग्यत्वं ध्वनित्वमस्ति वा ?

# X. 3. रत्यादीनां संलक्ष्यक्रमत्वविचारः

**प्राक् तल्पगतापि च सुतनुः** इति पद्यव्याख्यानान्ते **उपपादयिष्यते च स्थाय्यादीनामपि संलक्ष्यक्रमत्वम्** इत्युक्तवता पण्डितराजेन स्थाय्यादीनामपि संलक्ष्यक्रमत्वं प्रतिज्ञातम् । सर्वोऽपि प्राङ्निरूपितः रसादिलक्षणः व्यङ्ग्यप्रपञ्चः सति स्फुटे प्रकरणे, सत्सु च झटिति प्रतीतेषु विभावानुभावव्यभिचारिषु, सहृदयतमेन प्रमात्रातिसूक्ष्मेणैव समयेन प्रतीयत इति, हेतुभूतानां विभावानुभावव्यभिचारिणाम्, हेतुमतः रत्यादेश्च पौर्वापर्यक्रमस्य सामान्यतः अलक्षणात्, असंलक्ष्यक्रम एव रसादिध्वनिः ।

यत्र तु रत्यादिविस्फोरकं प्रकरणं विचारवेद्यम्, विभावादयश्च स्वशब्दानुक्तत्वात् अभ्यूहनीयाः, तत्र सामाग्रीविलम्बादिना चमत्कृतेः मान्यर्थ (विलम्बः) इति, स सर्वोऽपि संलक्ष्यक्रमस्यैव विषयः भवितुमर्हति। यथा—

**तल्पगतापि च सुतनुः श्वासासङ्गं, न या सेहे ।**
**सम्प्रति सा हृदयगतं प्रियपाणिं मान्दमाक्षिपति ।। पृ. १४.**

इति प्रागुदाहृते ध्वन्युदाहरणे **सम्प्रति** इत्यस्य प्रस्थानपूर्वरजन्याम् इति व्यख्यानस्य ग्रहणानन्तरं प्रकरणस्य स्पष्टीभावात्, प्रियपाणेः मान्दाक्षेपाख्येन अनुभावेन प्रतीतस्य रत्याख्यस्य स्थायिभावस्य स्फूर्तेः कार्यकारणयोः क्रमस्य स्पष्टतया संलक्ष्यक्रममाणत्वात् अत्रत्यरतेः संलक्ष्यक्रमत्वम् ।

न च रत्यादीनां धर्मिणां ग्राहकेन प्रमाणभूतेन सहृदयानुभावेन, तदुल्लसितेन व्यञ्जनाव्यापारेण वा असंलक्ष्यक्रमतयैव रत्यादेः व्यक्तत्वात् नास्ति संलक्ष्यक्रमत्वमिति वाच्यम्। धर्मिग्राहकमानेन रत्यादेः अभिव्यक्तावपि तद्गतासंलक्ष्यक्रमत्वस्य अनभिव्यक्तत्वात् । अत एव—

**एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी**
**लीलाकमलपत्राणि गणयामास पार्वती ।। पृ. १३०.**

इति पद्ये अधोमुख्या पार्वत्या कृतेन लीलाकमलपत्रगणनेन अनुभावेन अभिव्यक्तायाः लज्जायाः किं संलक्ष्यक्रमत्वम् उत असंलक्ष्यक्रमत्वम् ? इति विचारे प्रसक्ते केवलाधोमुखत्वविशिष्टलीला-कमलपत्रगणनस्य कुमारीजनस्वाभाव्यादपि सम्भवात्,लज्जायाः स्फूर्तिः नैयत्येन न सम्भवति । अतः **एवं वादिनि देवर्षौ** इति श्लोकस्य वाक्यैकदेशात् देवर्षिकृतविवाहादि प्रसङ्गोत्तरम् इत्यर्थग्रहणान्तरमेव, देवर्षिकृतविवाहप्रसङ्गविज्ञानोत्तरत्वविशिष्टलीलाकमलपत्रगणनेन लज्जाख्य-भावस्फूर्तेः, विलम्बितत्वात् संलक्ष्यक्रम एवायं भावध्वनिरिति आनन्दवर्धनाचार्याः प्राहुः ।

**रसभावादिरर्थः ध्वन्यभाव एव न वाच्यः, तथापि न सर्वः अलक्ष्यक्रमस्थविषयः** इति कथयद्भिः अभिनवगुप्तपादाचार्यैरपि रत्यादीनां संलक्ष्यक्रमत्वं प्रत्यपादि । अतः रसादिध्वनिः संलक्ष्यक्रमोऽपि आनन्दवर्धनाभिनवगुप्तादिमते सिद्ध्यतीति पण्डितराजस्याशयः ।

ननु रसादिरपि यदि संलक्ष्यक्रमध्वनेः विषयः, तर्हि अर्थशक्त्यनुरनात्मकभेदगणनाप्रस्तावे अर्थात् संलक्ष्यक्रमध्वनिप्रस्तावे **अर्थशक्तिमूलस्य द्वादशभेदाः** इत्यभिनवगुप्तोक्तिः, **तेनायं द्वादशात्मकः** इति मम्मटाचार्यस्य उक्तिश्च कथं सङ्गच्छेत । यतो हि— स्वतस्सम्भवित्व-कविप्रौढोक्तिनिष्पन्नत्व-कविनिबद्धवक्तृप्रौढेक्तिनिष्पन्नत्वात्मना त्रिप्रकारस्य वाच्यस्य वस्त्वलङ्कारात्मना प्रत्येकशो द्वैविध्यात् व्यञ्जकस्य वाच्यस्य षाड्विध्ये सम्पन्ने, ततः व्यङ्ग्यस्य अर्थस्य वस्त्वलङ्कारात्मना प्रत्येकं द्वैविध्यात् द्वादशविधत्वमिति अभिनवगुप्तमम्मटाभ्यां प्रतिपादितम् ।

किन्तु पूर्वोक्तरीत्या अभिनवगुप्तादिभिरपि रसादेः संलक्ष्यक्रमत्वे स्वीकृतौ, अर्थशक्तिमूलध्वनि-प्रभेदानां षण्णां व्यञ्जकवाच्याश्रितानां वस्त्वलङ्कारात्मकव्यङ्ग्यस्य प्रत्येकशो योगेन यथा अर्थशक्तिमूलध्वनेः द्वादशविधत्वम् अभ्युपगतम्, एवं तन्मतानुसारेण संलक्ष्यक्रमव्यङ्ग्यस्य रसभेदानां षण्णां मेलनेन अर्थशक्तिमूल-ध्वनेः अष्टादश विधत्वमभ्युपगन्तव्यम्। ततश्च **तेनायं द्वादशात्मकः** इति द्वादशप्रभेदत्वं कथं सङ्गच्छते इति चेत्—

अत्रोच्यते। स्पष्टतया अवस्थितैः विभावानुभावव्यभिचारिभिः असंक्ष्यक्रमत्वेनैव अभिव्यञ्जमानः रत्यादिः स्थायीभावः रसी भवति। न तु संलक्ष्यक्रमतया विद्यमानः रत्यादिः स्थायी । यतो हि रसीभावः नाम झटिति जायमानालौकिकचमत्कारविषयस्थायित्वम् । तद्यदि रत्यादिः स्थायी विभावादिभिः संलक्ष्यक्रमतया व्यज्येत, तर्हि तादृशरत्यादेः स्थायिनः झगिति चमत्कारजनकत्वात् वस्तुमात्रत्वमेव न रसादित्वमिति आनन्दवर्धनाभिनवगुप्तादीनाम् अभिप्रायस्य वर्णनेन, व्यङ्ग्यवस्तुप्रभेदकृताः षड्भेदाः गणिता एवेति, न पुनः अर्थशक्तिमूलध्वनिप्रभेदेषु वस्तुध्वनिभेदातिरिक्ततया संलक्ष्यक्रमरत्यादिध्वनिप्रभेदगणनाऽऽवश्यकता ।

ननु सर्वत्र असंलक्ष्यक्रमत्वेन प्रसिद्धस्य रत्यादेः, इह संलक्ष्यक्रमत्वं कथम् उपपद्यत इति चेत्- **उपपत्तिस्त्वर्थेऽस्मिन् विचारणीया** इति एतत् समस्यापरिष्काराय युक्तिरालोचनीयेति पण्डितराजः अस्माकमालोचनावकाशं ददाति, न तु साक्षात्समादधाति। अयमभिप्रायः यत्र विभावादिप्रतीतेः रत्यादिप्रतीतेश्च सूक्ष्मकालान्तरत्वरूपः क्रमः सहृदयेन न लक्ष्यते, तत्रैव विगलितवेद्यान्तरत्वं रत्यादिप्रतीतेः सिद्ध्यति। तयोर्मध्ये क्रमो यदि गृह्येत, तदा वेद्यान्तरव्यवधानेन प्रतीयमानस्य रत्यादेः रसत्वमेव भज्येत ।

अतः रत्यादेः रसत्वान्यथानुपपत्तिरूपार्थापत्तिप्रमाणेन असंलक्ष्यक्रमत्वमेव रत्यादेः सामान्यतः सिद्ध्यति। यत्र तु प्रकरणादिज्ञानविलम्बेन विभावादिज्ञानविलम्बेन वा रत्यादिप्रतीतौ विलम्बो भवति, तत्र विद्यमानरत्यादेः विगलितवेद्यान्तरत्वलक्षणरसत्वायोगात् वस्तुमात्रत्वम् एव स्वीकार्यम् इति पण्डितराजसम्भावितोपपत्तेश्चिन्ता । **रसाभावादिरर्थः ध्वन्यमान एव न वाच्यः** इत्याद्यभिनवगुप्तवाक्ये रसपदन्तु रत्यादिपरतया उपयुक्तमिति रत्यादीनां संलक्ष्यक्रमत्वेऽपि तदुक्तरीत्या न काचिद्धानिः ।

## X. 4. रसादिध्वन्यभिव्यञ्जकनिरूपणम्

एवं प्राङ्निरूपितस्य रसादिध्वनिप्रपञ्चस्याभिव्यञ्जकोपायाः के इत्युक्ते पदम्, वर्णाः, रचना, वाक्यम्, प्रबन्धः, प्रत्ययादिरूपपदैकदेशः, अवर्णात्मकाः रागादयाश्च रसादिध्वनीनाम् अभिव्यञ्जकाः इति प्राञ्चस्समामनन्ति ।

### X. 4. i. पदम्

तत्र वाक्यगतानां पदानां सर्वेषामपि वृत्त्या स्वार्थोपस्थितिद्वारा वाक्यार्थज्ञानोपायत्वे समानेऽपि, किञ्चिदेव हि पदं कुर्वद्रूपतया चमत्कारायोगव्यवच्छेदं (नैयत्येन चमत्कारं) जनयतीति पदस्य व्यञ्जकत्वं समायातम् । यथा बीजत्वाविशेषात् कुसुमस्थबीजादपि अङ्कुरोत्पत्तिप्रसक्तौ तद्वारणाय बौद्धैः कारणे बीजादौ अङ्कुरादिकार्यजननक्षमा कुर्वद्रूपत्वात्मिका काचित् जातिः अथवा शक्तिः स्वीक्रियते, तथा पदार्थोपस्थापकत्वशक्तिसाम्यवत्स्वपि पदेषु मध्ये कस्यचित् पदस्य रसादिध्वन्यभिव्यञ्जनक्षमत्वात्मिका काचन शक्तिः स्वीक्रियते। एवञ्च पदस्य व्यञ्जकत्वं सिद्धम्।

एतच्च पदव्यञ्जकत्वम्– **सम्प्रति सा हृदयगतं प्रियपाणिं मन्दमाक्षिपति** इत्यत्र मन्दमितिपदे दृष्टम् । यदि प्रियपाणिमाक्षिपति इत्येव उच्येत, तर्हि प्रियपाणेः बलात् अपसारणे कोमलत्वस्यास्फूर्तेः नायिकायाः नायकालम्बनरतेः अप्रकाशनापत्तिः । अत एव तादृशरतिप्रकाशनानुकूलतया **मन्दम्** इति पदं विन्यस्तम् । एवञ्च पदस्य रसादिध्वनिप्रकाशकत्वं सिद्धम् ।

रचना-वर्णानां स्वातन्त्र्येण रसादिप्रकाशकत्वं नास्ति । किन्तु पदवाक्यान्तर्गतत्वेन तेषां व्यञ्जकतावच्छेदककोटिप्रविष्टत्वमेव न व्यञ्जकत्वम् इति यद्यपि वक्तव्यम् । तथाऽपि किं पदवाक्यविशिष्टरचनात्वेन व्यञ्जकत्वम्? उत रचनाविशिष्टपदवाक्यत्वेन व्यञ्जकत्वमिति विचारे प्रसक्ते विनिगमनाविरहेण घटादिकं प्रति दण्डादीनामिव कारणत्वं स्वीकार्यम् । यथा घटं प्रति किं

चक्रादिविशिष्टदण्डत्वादिना कारणत्वम्? उत दण्डादिविशिष्टचक्रत्वादिना कारणत्वम् इति सन्देहे विनिगमनाविरहात् घटं प्रति दण्डादीनां दण्डत्वेन चक्रत्वेन च प्रत्येकमेव कारणत्वं स्वीक्रियते ।

एवं पदवाक्यादिविशिष्टरचनात्वेन कारणत्वासम्भवात् प्रत्येकमेव रचनावर्णादीनां रचनात्वादितत्तत्धर्म-पुरस्कारेण व्यञ्जकत्वमिति पूर्वोक्तानां सर्वेषामेव व्यञ्जकत्वं प्राचीनमते सिद्ध्यति इति प्राञ्चः आहुः ।

नवीनास्तु वर्णरचनाविशेषाणां माधुर्यादिगुणाभिव्यञ्जकत्वम् एव न गुणीभूतरसाभि-व्यञ्जकत्वम्। रसाभिव्यञ्जकसङ्ख्यासंवर्धने गौरवात्, प्रमाणाभावाच्च । वर्णरचनाविशेषाणां गुणाभिव्यक्तिम्प्रत्येव अन्वयव्यतिरेकौ स्तः न गुण्यभिव्यक्तिम्प्रति । न च गुण्यभिव्यक्तिं विना गुणाभिव्यञ्जकत्वस्यायोगात् वर्णरचनाविशेषाणां माधुर्यादिगुणाभिव्यञ्जकत्वमिव गुणवद्रसाभि-व्यञ्जकत्वमप्यस्तीति वाच्यम्। घ्राण-रसना-श्रोत्रात्मकेषु गन्ध-रस-शब्दाभिव्यञ्जकेषु त्रिषु इन्द्रियेषु गुण्यभिव्यञ्जनं विनाऽपि गुणाभिव्यञ्जकत्वस्य सद्भावात्, तत्र गुणिनां पृथिवी-जल-आकाशानां चक्षुः-त्वक्-अनुमानैरेव ग्रहणात् ।

इत्थञ्च घ्राणादिभिः पृथिव्यादीनामिव, वर्णरचनाभिः गुणिनां रसानामनभिव्यञ्जनात् **मधुरं जलम्, माधुर्यं जलञ्च** इत्यादौ क्रमेण यथा गुणस्य माधुर्यस्य रसनया संश्लिष्टतया विश्लिष्टतया वा अभिव्यक्तिः, जलस्य च त्वक्-चक्षुः-अनुमानादिप्रमाणान्तरेणैव। एवमेव गुणानां वर्णरचनादिनाभिव्यक्तावपि गुणिनः रसादेः पदवाक्यादिव्यञ्जकान्तरेणैव प्रकाश्यत्वम्, न तु वर्णरचनादिभिः इति नवीनानामभिप्रायः ।

## X. 4. ii. & iii. वर्णाः, रचना च

वर्णरचनादीनां माधुर्यादिगुणाभिव्यञ्जकत्वन्तु—

**तान्तमालतरुकान्तिलङ्घिनीं किङ्करीकृतनवाम्बुदत्विषम् ।**
**स्वान्त मे कलय शान्तये चिरम् ——————— ।।**

इत्यादिपद्ये तवर्गपञ्चमाक्षरसंयोगादिना सिद्धमेव ।

## X. 4. iv. वाक्यम्

**आविर्भूतायदवधिमधुस्यन्दिनी नन्दसूनोः** इत्यादिश्लोकात्मकवाक्यपठनेन विप्रलम्भ-शृङ्गारस्याभिव्यक्तेः वाक्यस्य रसाद्यभिव्यञ्जकत्वं प्रसिद्धमेव ।

## X. 4. v. प्रबन्धः

योगवाशिष्ठे शान्तस्य, रामायणे करुणस्य चाभिव्यक्तेः, रत्नावल्यादौ शृङ्गारस्याभिव्यक्तेः प्रबन्धस्य रसाभिव्यञ्जकत्वं सिद्धम् । एवं पण्डितराजजगन्नाथनिर्मितानाम् **अमृतलहरी-करूणालहरी-पीयूषलहरी-लक्ष्मीलहरीसुधालहरी** इति पञ्चलहरीणां भावप्रकाशकत्वं प्रसिद्धमेव।

## X. 4. vi. प्रत्ययादिरूपपदैकदेशः

**निखिलमिदं जगदण्डकं वहामि** इत्यत्र अल्पार्थक-कप्रत्ययस्य पदैकदेशस्य वीररसाभि-व्यञ्जकत्वात् पदैकदेशस्यापि व्यञ्जकत्वम्।

## X. 4. vii. अवर्णात्मकाः रागादयः

रागादीनां रसाभिव्यञ्जकत्वे तु सहृदयहृदयमेव प्रमाणम्। एवमेतेषां प्राधान्येन व्यङ्ग्यत्वे ध्वनित्वम् अप्राधान्येन व्यङ्ग्यत्वे रसवदलङ्कारत्वमेव ।।

## X. 5. पाठ्यांशेऽस्मिन् सम्भाविताः प्रश्नाः

### विशंत्यङ्कप्रश्नाः

1. भावशान्ति-भावोदय-भावसन्धि-भावशबलतानां स्वरूपं सोदाहरणं विवेचयत ?
2. **भावोदयादिध्वनिषु सर्वत्र भावध्वनित्वमेव** इति वादं समर्थयत ?
3. रत्यादीनां संलक्ष्यक्रमत्वं निरूप्य तत्र सम्भवन्तीः अनुपपत्तीः विचारयत ?
4. रसध्वनिव्यञ्जकत्वं केषां केषामिति सम्यक् स्फुटयत ?

### पञ्चाङ्कप्रश्नाः

1. भावशबलताविषये प्रवृत्तं यत्तुमतं खण्डयत ?
2. भावशान्तिः
3. भावोदयः
4. भावसन्धिः
5. भावशबलता

# XI. परिशिष्टम्

## XI. 1. प्रारम्भश्लोकव्याख्यानम्

**स्मृतापि तरुणातपं करुणया हरन्ती नृणा-**
**मभङ्गुरतनुत्विषां वलयिता शतैर्विद्युताम् ।**
**कलिन्दगिरिनन्दिनीतटसुरद्रुमालम्बिनी,**
**मदीयमतिचुम्बिनी भवतु काऽपि कादम्बिनी ।।**

रसगङ्गाधरप्रारम्भे तत्र भवान् पण्डितराजो जगन्नाथः प्रारिप्सितग्रन्थस्य समाप्तिं कामयमानः, ग्रन्थपरिसमाप्तिप्रतिबन्धकीभूतदुरितविशेषनिवृत्तिं वा कामयमानः गोपिकाऽऽश्लिष्ट-कृष्णनमस्कारात्मकं मङ्गलं ग्रन्थादौ **स्मृतापि तरुणातपम्** इत्यादिना **मदीयमतिचुम्बिनी भवतु काऽपि कादम्बिनी** —इत्यनेन विस्तारयति। जगन्नाथस्य गङ्गाभक्तिः कृष्णभक्तिश्च अत्यन्तं प्रसिद्धे। यतः सः गङ्गां स्तोतुं गङ्गालहरीमेव वितेने ।

तस्य कृष्णभक्तिरपि **वाचानिर्मलया—** इत्यादिपद्ये **त्वत्तो नास्ति दयानिधिर्यदुपते मत्तो न मत्तः परः** इति वचनेन अत्यन्तं प्रसिद्धैव। गङ्गां गङ्गाधरञ्च ग्रन्थनामन्येव घटयन् ग्रन्थप्रारम्भे श्रीकृष्णमेव संस्तौति । सत्सु बह्वीषु देवतासु श्रीकृष्णस्यैव संस्तवः किमर्थः ? तस्य ग्रन्थप्रारम्भे स्मरणेऽपि स्ववाचकशब्देन तम् अनुपादाय, कादम्बिनीत्वेन अध्यवसायं कृत्वा स्मरणं किमर्थमिति प्रश्नः उपतिष्ठते । तस्येदं समाधानं भवतु । शास्त्रग्रन्थेषु शृङ्गाररसस्थले वर्णस्य श्यामत्वेन सूचितत्वात्, तद्देवत्वेन च भगवद्विष्णोरेव उक्तत्वात्, रसादिप्रमुखालङ्कार-शास्त्रीयविषयनिरूपणपरे निबन्धेऽस्मिन् भगवतः विष्णोः अवतारस्य कृष्णस्वरूपस्य संस्मरणं नितान्तमौचित्यमावहति ।

कादम्बिनीशब्दस्य **मेघमाला** इत्यर्थः । **सा मदीयमतिचुम्बिनी भवतु** इत्युक्ते मेघत्वेनाध्यवसितः भगवान् कृष्णः विजातीयप्रत्ययानन्तरितसजातीयप्रत्ययप्रवाहरूपध्यानविषयः भवतु —इति **मालार्थक** कादम्बिनी शब्दस्वारस्यात् लभ्यते । सा च **मेघमाला** कुत्र अस्ति इत्युक्ते-– **कलिन्दगिरिनन्दिनी** इत्यादि समाधानम्। तथा च कालिन्दीनदीतीरस्थदेवदारुद्रुमाश्रया सती

मेघमाला वर्तते । किञ्च अनश्वरदेहकान्तीनां विद्युतां गोपिकानां शतैः वलयिता एषा कादम्बिनी, अर्थात् बृन्दावने कालिन्दीनदीतीरे गोपिकाशतैः क्रीडन्ती कृष्णाख्या मेघमाला इत्यर्थः । अथवा कादम्बिनीशब्देन भगवतः श्रीकृष्णपरब्रह्मणः शक्तिस्वरूपिणी माया= राधैव गृह्यते । तस्याः परिचारिकाः अङ्गदेवता एव शतं विद्युतः इति समन्वयो ग्राह्यः ।

किञ्च सा मेघमाला कीदृशी इत्युक्ते— स्मरणमात्रेणैव प्रौढमपि समन्तात् व्याप्तं तापं करुणया= भक्तजनवात्सल्येन हर्तुं क्षमा । लोके हि प्रसिद्धा कादम्बिनी यद्यपि तापं हर्तुं प्रभवति, किन्तु सा बालातपमेव न तरुणातपम् । अन्यच्च सा तप्तदेशेषु स्वावयवसंयोगेनैव आतपनिवारणं कर्तुं प्रभवति, न स्मरणमात्रेण। किञ्च जडा सा मेघमाला अन्यप्रेरितेव तापहरणक्षमा भवति, न करुणया स्वयं तापं हर्तुं प्रभवति। अन्यच्च यस्मिन् देशे सा मेघमाला स्थितवती, तस्मिन्नेव देशे विद्यमानानां जनानां तापं निवारयितुं प्रभवति, न सर्वेषामेव जनानाम् । तादृशं तु सामर्थ्यं भगवत्त्वेन अध्यवसितायाः मेघमालायाः एव अस्ति ।

एवञ्च प्रसिद्धमेघमालातः भगवद्रूपायाः कादम्बिन्याः व्यतिरेकस्य व्यज्यमानत्वात्, तस्य च कविगतकृष्णविषयकरतिभावाङ्गत्वात् पद्येऽस्मिन् प्राधान्येन भक्तिभावः व्यतिरेकालङ्काराश्रया पोषितस्सन् अभिव्यज्यते इति शम् ।।

# XI. 2. रसगङ्गाधरप्रस्तावनाश्लोकाः

1. श्रीमज्ज्ञानेन्द्रभिक्षोरधिगतसलक-ब्रह्मविद्याप्रपञ्चः ।
काणादीराक्षपादीरपि गहनगिरो यो महेन्द्रादवेदीत् ।। १ ।।

2. देवादेवाध्यगीष्ट स्मरहरनगरे शासनं जैमिनीयम्
शेषाङ्कप्राप्तशेषाऽमलभणितिरभूत् सर्वविद्याधरो यः ।। २ ।।

3. पाषाणादपि पीयूषं स्यन्दते यस्य लीलया।
तं वन्दे पेरुभट्टाख्यं लक्ष्मीकान्तं महागुरुम् ।। ३ ।।

4. निमग्नेन क्लेशैर्मननजलधेरन्तरुदरं
मयोन्नीतो लोके ललितरसगङ्गाधरमणिः।
हरन्नन्तर्ध्वान्तं हृदयमधिरुढो गुणवता-
मलङ्कारान् सर्वानपि गलितगर्वान् रचयतु ।। ४ ।।

5. परिष्कुर्वन्त्वर्थान्सहृदयधुरीणाः कतिपये
तथापि क्लेशो मे कथमपि गतार्थो न भविता ।
तिमीन्द्राः सङ्क्षोभं विदधतु पयोधेः पुनरिमे
किमेतेनायासो भवति विफलो मन्दरगिरेः ।। ५ ।।

6. निर्माय नूतनमुदाहरणानुरूपं
काव्यं मयात्र निहितं न परस्य किञ्चित् ।
किं सेव्यते सुमनसां मनसापि गन्धः
कस्तूरिकाजननशक्तिभृता मृगेण ।। ६ ।।

7. मननतरितीर्णविद्याऽर्णवो जगन्नाथपण्डितनरेन्द्रः ।
रसगङ्गाधरनाम्नीं करोति कुतुकेन काव्यमीमांसाम् ।। ७ ।।

8. रसगङ्गाधरनामा सन्दर्भोऽयं चिरं जयतु ।
किञ्च कुलानि कवीनां निसर्गसम्यञ्चि रञ्जयतु ।। ८ ।।